दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णद्वितीया
भाद्रपद 14 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-11 ■ वर्ष-5 ■ अङ्क-311 | 1 | अगस्त 30, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 द्विदिवसीययात्रार्थम् उज्बेकिस्तानस्य राजधानीं ताशकन्द-नगरं प्राप्तवान् प्रधानमन्त्री नरेन्द्रमोदी
4 नेपाल-विभीषिकातः शिक्षणम् - हिमालीय-टनल-सेतु-परियोजनानां भविष्यति तीक्ष्णं निरीक्षणम्, प्रधानमन्त्रिकार्यालयेन याचितं विवरणम्
9 सरस्वती- संस्कृत-महाविद्यालये सम्पन्नं संस्कृतदिवसाचरणम्

## प्रधानमन्त्रिणः मोदिनः मध्य-एशिया-प्रवासः प्रारब्धः उज्बेकिस्तान-किर्गिज़-देशाभ्यां सह द्विपक्षीय-वार्तायाः रूपरेखा च सज्जीकृता




प्रधानमन्त्री नरेन्द्रमोदी उज्बेकिस्तान, किर्गिज गणराज्यस्य च चतुर्दिवसीय यात्रायै प्रस्थितवान्। श्रीमोदिना प्रस्थानात् प्राक् भणितं यत् एतस्याः यात्रायाः उभयोर्देशयोः मध्ये भारतस्य रणनीतिक-परस्परता, सम्पृक्तता च दृढयिष्यते। प्रधानमन्त्रिणा प्रोक्तं यत् असौ उज्बेकिस्तानीय राष्ट्रपतिना शफ़कत मिर्जियोयेफ-वर्येण साकं व्यापार-निवेश-डिजिटल-सम्पर्क-रक्षोर्जा-क्षेत्रे सहयोगं विवर्धयितुं चर्चा विधास्यति। एतेन सहैव विकसित भारत-दिशि अपि सम्भाषणं भविष्यति। उज्बेकिस्ताने भारतस्य राजदूतेन स्मिता पंतेन आकाशवाण्या सह विशिष्टे साक्षात्कारे भणितं यत् उज्बेकिस्ताने प्राकृतिक संसाधनानां भण्डारो विद्यते। तया प्रोक्तं यत् उभयोः देशयोः मध्ये निवेश-महत्वपूर्ण-खनिज-क्षेत्राणां हस्तांतरणे चर्चा अपि संभाव्यते।



## भारतं स्व-सभ्यतायाः सामर्थ्यस्य च बलेन जगति गौरव-स्थानं प्राप्नोति - राजनाथ-सिंहः

रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् भारतं केवलं अर्थव्यवस्थारूपेण न अपितु स्वीय सभ्यता-संस्कृति, सामर्थ्येन, आत्मविश्वासेन च विकसित राष्ट्ररूपेण उदितमस्ति। लखनऊ नगरे बाबासाहेब-भीमराव अम्बेडकर-विश्वविद्यालयस्य एकादशे दीक्षान्तसमारोहे भाषमाणः श्रीसिंहः उक्तवान् यत् यदा भारतदेशः किमपि वदति तदा सम्पूर्णः विश्वः श्रृणोति । असौ भणितवान् यत् नवभारतस्य महान् परिवर्तनम् इदम् अस्ति यत् देशः न केवलं वैश्विक नियमान् अनुसरति अपितु तेषां निर्माणे अपि योगदानं ददाति ।

## नेपाले हृदयविदारकाप्लावे हतानां सङ्ख्या षड्विंशत्यधिकषड्शतं यावत् अभवत्

### भारतीय-दलेन आपत्-उद्धार-कार्याणि च तीव्रीकृतानि

नेपाल-देशे जलपूर-विभिषिकायां मृतकानां संख्या षड्विंशत्युत्तर-षड्शत-सञ्जाता । द्विसहस्राधिकाश्च जनाः लुप्ताः सूच्यन्ते। आरक्षिदलेन त्रयस्त्रिंशदुत्तर-द्विशतात्मकाः शवाः चितवान जनपदे अधिगताः। पश्चिम नवलपारासी क्षेत्रे अष्ट-पञ्चाशदुत्तरैकशत, गोरखायाम् अष्टचत्वारिंशत् शवाः अधिगताः। एतदतिरिच्य बहुषु क्षेत्रेषु बहवः मृतावशेषाः सम्प्राप्ताः। हिमालयीय-क्षेत्रे प्रभावितेषु जनपदेषु साह्ययोद्धार-कर्याणि द्रुतगत्या प्रचलन्ति। विदेश-मन्त्रालयेन सूचितं यत् विंशत्युत्तर-त्रिंशत् भारतीय-नागरिकाः साम्प्रतमपि विलुप्ताः । विदेश-मन्त्रालयस्य प्रवक्त्रा रणधीर-जायसवालेन नवदेहल्यां वार्ताहरैः सह सम्लपन् प्रोक्तवान् यत् भारतीय-मूलस्य आहत्य शताधिकाः जनाः अधुना अपि सम्पर्क-विहीनाः सन्ति। अत्रान्तरे नेपाल प्राधिकरणेन



ऊनत्रिंशदुत्तर-द्विशत-अज्ञात-शवाः अपि अधिगताः। चितवान-जनपदे चिकित्सालये-उपचाराधीनाः व्रणिताः जनाः उपचारे-समस्याः सम्मुखी कुर्वन्ति । नेपालदेशस्य राष्ट्रपतिः रामचन्द्र पौडेलः भारतीय राष्ट्रपतिं द्रौपदी मुर्मु प्रति कृतज्ञतां ज्ञापितवान्। नेपाल देशस्य राष्ट्रपतिः रामचन्द्र पौडेलः भारतीय-राष्ट्रपतिं द्रौपदी मुर्मु प्रति कृतज्ञतां ज्ञापितवान्। नेपालदेशे विनाशकारी आकस्मिक-जलप्रवाहे शतशः जनाः मृताः, व्यापकः विनाशः च जातः। अस्मिन् समये भारतीय-प्रशासन-द्वारा प्रदत्तायै सहायतायै समर्थनाय च पौडेल-वर्येण धन्यवादः प्रकटितः । असौ बुधवासरे सञ्जाते अस्मिन् जलाप्लावे भारतीय-जनानां मृत्योः विषयेऽपि शोकं अभिव्यक्तवान्।

## प्रधानमन्त्री नरेन्द्रमोदी आकाशवाणीतः स्वीये मन-की-बात इति मासिक-कार्यक्रमे भारतीयैः सह स्वविचारान् प्रकटयिष्यति

प्रधानमन्त्री नरेन्द्रमोदी आकाशवाणीतः स्वीये मन-की-बात इति मासिक-कार्यक्रमे भारतीयैः सह स्वविचारान् प्रकटयिष्यति। कार्यक्रमस्य अस्य इदं सप्तत्रिंशदुत्तर-शततमं संस्करणं विद्यते। कार्यक्रमोऽयं आकाशवाणी-दूरदर्शनस्य च सर्वासु वाहिनीषु सम्प्रसार्यते। एतदतिरिच्य यू-ट्यूब, डीडी न्यूज, सूचना-प्रसारण-मन्त्रालये सर्वत्र अस्य कार्यक्रमस्य प्रसारणं भविष्यति।

## अद्यतनीयं सुभाषितम्

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**
**ब्रह्मचर्यमहिंसा च,शारीरं तप उच्यते।।**
**(श्रीमद्भगवद्गीता)**

अर्थात्- देवता, ब्राह्मण, गुरु और माता-पिता का आदर-पूजन करना, बाहर और भीतर (शरीर और आचरण) की शुद्धि रखना, स्वभाव और व्यवहार में सरलता, इंद्रियों पर नियंत्रण रखना, वासनाओं से दूर रहना और किसी भी जीव को मन, वचन या कर्म से कष्ट न पहुँचाना, इन सभी क्रियाओं को शरीर द्वारा किया जाने वाला 'तप' कहा जाता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणाः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा



## भारतस्य आर्थिक प्रगतिः, कुशल-जनशक्तिः, आधुनिक-संरचना च वैश्विक-निवेशकान् आकर्षयन्ति - राष्ट्रपतिः द्रौपदी मुर्मूः

शिकागो-नगरे आयोजिते 'बिज़नेस् राउण्डटेबल्' सम्मेलने वित्तमन्त्री निर्मला सीतारमण ने न्यगादीत् यत् भारतस्य आर्थिक प्रगतिः, कुशल-जनशक्तिः, आधुनिक-संरचना च वैश्विक-निवेशकान् आकर्षयन्ति। मन्त्रिणा उद्घोषितं यत् भारतं न केवलं व्यापार-स्थलम्, अपितु जगति उत्पादन-प्रदानस्य विशाल-केन्द्रम् अस्ति। वित्त-मन्त्री 'आत्मनिर्भर-भारतम्' तथा आई.डी.ई.एक्स.' सदृशानाम् उपक्रमाणाम् उल्लेखं कुर्वती उक्तवती यत् भारतं ड्रोण, स्वायत्त-प्रणाली इत्यादीनाम् आधुनिक-प्रयोगिकीनां क्षेत्रे स्वदेशी-सामर्थ्यं वर्धयति । सा वैश्विकनिवेशकान् सह-विकासाय सह-उत्पादनाय च आमन्त्रितवती, भारतं केवलं सेव्य-विपणिरूपेण न दृष्ट्वा अपितु विश्व-निर्माणस्य मञ्चरूपेण स्वीकर्तुम् सा न्यवेदयत्।



## अमेरिकी-राष्ट्रपतिना डॉनाल्ड ट्रम्प इत्यनेन वेनेजुएला देशेन सह तैलसन्धेः महती घोषणा विहिता

अमेरीकी राष्ट्रपतिना डॉनाल्ड ट्रम्पेण वेनेजुएला देशेन साकं बृहत्तम-तैल-सन्धिः घोषणा विहितास्ति। वेनेजुएला देशेन साकं अस्मात् सन्धेः अमेरिकादेशः पञ्चषष्टिः अर्बुद् वैरल-तः अधिक-असंशोधित तैल-भण्डारणे- नियन्त्रणं स्थापयिष्यति। यदि अमेरिका-देशः सन्धिनिष्ठां दर्शयति, तर्हि ईरानः अपि स्व-प्रतिबद्धतां परिपालयिष्यति - ईरान-देशस्य राष्ट्रपतिः। इरान-देशस्य राष्ट्रपतिः मसूद-पेज़ेश्कियन् प्रावोचत् यत् तेहरान नगरात् अमेरिका-देशेन सह कूटनीतिक-वार्तायै द्वारम् उद्घाटितम् अस्ति, तथापि वाशिङ्गटन्-प्रशासनं प्रति सावधानता अपि परिपालनीया अस्ति। तेन उक्तं यत् यदि अमेरिका-देशः सन्धिनिष्ठां दर्शयति, तर्हि इरानः अपि स्व-प्रतिबद्धतां परिपालयिष्यति। एकस्मिन् दूरदर्शन-साक्षात्कारे पेज़ेश्कियन् इत्यनेन प्रोक्तं यत् कूटनीतिक-प्रयत्नाः जून-मासे हस्ताक्षरितस्य शान्ति-सहमति-पत्रस्य पुनः सक्रियीकरणे केन्द्रिताः भवितुं शक्नुवन्ति। तेन उल्लिखितं यत् अस्य सन्धेः क्रियान्वयन-काले इरानेन नवति-मिलियन् बैरल्-मितं खनिज-तैलम् निर्यातितम्। अपरे सन्देशे इरानस्य सर्वोच्च नेत्रा मुजतबा-खामेनेइ इत्यनेन देशस्य आर्थिक-जीविकोपार्जन-सङ्कटेभ्यः मुद्रास्फीतेः वृत्याभाव-समस्यायाः अथ विपणि-मूल्य-नियन्त्रणस्य च गभीर-समाधानाय आह्वानं विहितम्। असौ स्वदेशी उत्पादनस्य प्रोत्साहनं कुर्वन् आवश्यकतानुसारेण आयातस्य विवेकपूर्ण-उपयोगाय बलम् अयच्छत्।



## ओडिशा-राज्ये शनि-रविवासरयोः अति-वृष्टिपरा नारंगवर्णीया संचेतना

ऋतुविज्ञान-विभागेन ओडिशायां आगामि सोमवासरं यावत् भीषणातिभीषण-वृष्टेः नारंग-संचेतना प्रसारिता । भीषण-वृष्टेः कारणात् बिहार-पश्चिम बंगालः, झारखण्ड-मध्यप्रदेश-छत्तीसगढस्य च बहुषु क्षेत्रेषु वृष्टिः संभाव्यते । आगामि द्वि-त्रि-दिवसेषु भीषण-वृष्टिः भविष्यति इति ऋतुविज्ञान-विभागेन संसूचितम्।




## देशे क्रीडा-दिवसः आयोजितः प्रधानमन्त्रिणा मोदिना मेजर-ध्यानचन्द-वर्याय श्रद्धाञ्जलिः अर्पिता

हॉकी-निपुणं मेजर ध्यानचन्दं संस्मृत्य देशे क्रीडा-दिवसः आयोज्यते । प्रधानमन्त्रिणा मोदिना मेजर ध्यानचन्द-वर्याय श्रद्धाञ्जलिः अर्पिता, क्रीडकानां समर्पणस्य च भूरिशः प्रशंसा कृता। भारतस्य महान्तं क्रीडा-नायकं हॉकी-प्रवीणं मेजर ध्यानचन्द-वर्यं संस्मर्तुं तस्य जन्म जयन्त्याम् समग्रे देशे 'राष्ट्रीय-क्रीडा-दिवसः' सोल्लासेन आयोज्यते। एषः दिवसः भारतस्य समृद्धं क्रीडा-वैभवं दर्शयति, जन-सामान्यं च स्व-दैनिक जीवनस्य नियमित-भागरूपेण क्रीडाः अंगीकर्तुं प्रेरयति। प्रधानमन्त्री नरेन्द्रमोदी मेजर ध्यानचन्द-वर्याय भावाञ्जलिं समर्पयन् अवदत् यत् हॉकी-क्षेत्रे तस्य अतुलनीयं योगदानं सर्वदा राष्ट्राय प्रेरणा-स्रोतः स्यास्यति।



## केन्द्रीयमन्त्री प्रल्हादजोशी अवदत्, भारतं विश्वस्य प्रमुखं विनिर्माणकेन्द्रं भविष्यति

उपभोक्ता-कार्य-खाद्य-सार्वजनिक-वितरण-मन्त्री प्रल्हादजोशी अवदत् यत् 'विकसितभारतम्' एकं विनिर्माणकेन्द्रं भविष्यति, यदर्थं 'राष्ट्रीय-परीक्षण-गृह' सदृशीनां गुणवत्ता-मानक-प्रमाणीकरण-संस्थानाम् आवश्यकता वर्तते। बेङ्गलूरु-नगरात् राष्ट्रीय-परीक्षण-गृहस्य ११५ तम-स्थापना-वार्षिकोत्सवस्य अवसरे सः इदं न्यवेदयत्। श्रीजोशी-महोदयः देशस्य विविधभागेषु अङ्गारस्य (कोयला), सौर-जल-तापकस्य (सोलर वॉटर हीटर), पात्राणाम्, वैद्युतिक-वाहनानां तथा च वैमानिक-घटकानां परीक्षणार्थं स्थापितानां सुविधानाम् उद्घाटनम् अकरोत्। सः निर्मातृभ्यः राष्ट्रीय-परीक्षण-गृहे स्वोत्पादानां गुणवत्ता-परीक्षणार्थम् आवेदनं कर्तुं 'सुविधा' नाम्नीं चलदूरभाष-अनुप्रयोगम् (मोबाइल ऐप) अपि लोकार्पितवान्। श्रीजोशी-महोदयः परीक्षणगृहं वैश्विकस्तरे विश्वसनीयतां स्थापयितुम् आहूतवान्, येन तत्प्रमाणितः कश्चिदपि उत्पादः गुणवत्तायै सार्वभौमिकं विश्वासं प्राप्नुयात्। सः असूचयत् यत् भारतम् 'अन्तर्राष्ट्रीय-विधिक-मापन-सङ्गठनस्य' (OIML) त्रयोदशः (१३ तमः) आधिकारिकः सदस्यदेशः वर्तते। अस्य परिणामतः देशान्तर्गतस्तरे परीक्षितानां मापनोपकरणानां यन्त्राणां च कृते पूर्णा वैश्विकमान्यता प्राप्ता अस्ति।

## द्विदिवसीययात्रार्थम् उज्बेकिस्तानस्य राजधानीं ताशकन्द-नगरं प्राप्तवान् प्रधानमन्त्री नरेन्द्रमोदी




प्रधानमन्त्री नरेन्द्रमोदी दिनद्वयस्य यात्रायै उज्बेकिस्तानदेशस्य राजधानीं ताशकन्द-नगरं प्राप्तवान्। राष्ट्रपतिः शवकत्-मिर्जियोयेवः तस्य स्वागतम् अकरोत्। प्रधानमन्त्रिणः मोदिनः उज्बेकिस्तानदेशस्य इयं चतुर्थी यात्रा वर्तते। तस्य स्वागतार्थं सम्पूर्णं ताशकन्द-नगरं भारतीयध्वजैः स्वागतसन्देशैश्च अलङ्कृतम् अस्ति।
उभौ नेतारौ राष्ट्रपतिभवने द्विपक्षीयसम्बन्धानां विविधपक्षेषु चर्चां करिष्यतः। अपि च, व्यापार-निवेशौ, रक्षा, अङ्कीय-सम्पर्कः (डिजिटल-सम्पर्कः), ऊर्जा, शिक्षा तथा च उभयोः देशयोः जनानां परस्परसम्पर्कवर्धनस्य क्षेत्रेषु सहयोगविषये विचारविमर्शः भविष्यति।



## भारत-अर्जेण्टीना-देशाभ्यां रणनीतिक-आर्थिक-सम्बन्धानां सुदृढीकरणाय प्रतिबद्धता पुनरुच्चारिता

भारत-अर्जेण्टीना-संयुक्त-व्यापार-समित्याः चतुर्थम् उपवेशनं ब्यूनस-आयर्स-नगरे सम्पन्नम् अभवत्। उपवेशने २०२५ तमे वर्षे प्रधानमन्त्रिणः नरेन्द्रमोदिनः अर्जेण्टीना-यात्रायाः समये निर्धारितायाः कार्ययोजनायाः समीक्षा कृता। उभौ देशौ रणनीतिक-आर्थिक-सम्बन्धान् अधिकं सुदृढं कर्तुं प्रतिबद्धतां पुनरुच्चारितवन्तौ। उपवेशने खनन्-ऊर्जा-मूलसंरचना-क्षेत्रेषु निवेशस्य अवसरेषु चर्चा अभवत्। भारतस्य 'खनिज विदेश इण्डिया लिमिटेड' (काबिल) संस्था अर्जेण्टीना-देशस्य 'लिथियम'-क्षेत्रेऽपि महत्त्वपूर्णां प्रगतिम् अकरोत्। अनया संस्थया 'काटामार्का' प्रान्ते द्वितीयचरणस्य वेधनकार्यं (ड्रिलिंग) पूर्णं कृतम्। इयम् अर्जेण्टीना-देशे कस्यापि भारतीयसंस्थायाः प्रथमा लिथियम-खनन-परियोजना अस्ति। 'साल्टा' तथा 'जुजुय' प्रान्तयोः अपि नवीनावसराः अन्विष्यन्ते।
अर्जेण्टीना-विपण्यां भारतीयौषधोत्पादानां प्रवेशवर्धनस्य दिशि अपि प्रगतिः सञ्जाता। अनेन अर्जेण्टीना-देशे गुणवत्तापूर्णानां सुलभमूल्यानां च स्वास्थ्यसेवानाम् उपलब्धतायाः उन्नयनस्य आशा वर्तते।
उभौ पक्षौ आयुर्वेद-योग-क्षेत्रयोः सहयोगवर्धनविषये अपि सम्मतिं प्रकटितवन्तौ। अयं सहयोगः २०१९ तमे वर्षे अर्जेण्टीना-भारतयोः औषधमानकसंस्थानयोः मध्ये सम्पन्नां सहमतिपत्रिकाम् (MoU) आधारीकरोति।




# जसवां-प्रागपुरे मुख्यमन्त्रिणः महत्त्वपूर्णाः घोषणाः, डाडासीबायां एस.डी.एम. कार्यालयः, कस्बा-कोटलायां सामुदायिक-स्वास्थ्यकेन्द्रम्

**हिमसंस्कृतवार्ताः- जसवां प्रागपुरम्।**

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः शनिवासरे काङ्गडा-मण्डलस्य जसवां- प्रागपुर- विधानसभाक्षेत्रस्य डाडासीबायां नूतनम् उपमण्डलाधिकारी (एस.डी.एम.) कार्यालयम् उद्घाटयितुं घोषणां कृतवान्। सः अवदत् यत् नूतनकार्यालयसम्बन्धिनी अधिसूचना शीघ्रमेव निर्गमिष्यते। मुख्यमन्त्री क्षेत्रस्य स्वास्थ्यसेवानां सुदृढीकरणाय कस्बा कोटलायां स्थितं सामुदायिक- स्वास्थ्यकेन्द्रं चतुर्विंशतिः घण्टाः सञ्चालयितुम् आवश्यकप्रावधानानि कर्तुं घोषणामपि कृतवान्। मुख्यमंत्री सुक्खुः डाडासीबायां मुख्यमन्त्री- मत्स्य- सम्मान- निधि- योजनायाः अन्तर्गतं 1,012 मत्स्यजीवीपरिवाराणां कृते वित्तीयसहायतां वितीर्य विशालं जनसमूहं सम्बोधयन् एताः घोषणाः कृतवान्। मुख्यमन्त्री- मत्स्य- सम्मान- निधि- योजनायाः अन्तर्गतं प्रत्येकस्य परिवारस्य वित्तकोषसंख्यासु प्रत्यक्षलाभान्तरणम् (डी.बी.टी.) माध्यमेन 3,500 रूप्यकाणां राशिः प्रत्यक्षं हस्तान्तरिता। सः अवदत् यत् राज्यसर्वकारः मत्स्यग्रहणस्य वार्षिकप्रतिबन्धकालावधौ प्रत्येकस्मै मत्स्यजीवीपरिवाराय 3,500 रूप्यकाणां वार्षिकवित्तीयसहायतां प्रददाति। मत्स्यजीवी- समुदायस्य समस्याः कठिनताः च अवगत्य एव अस्य समुदायस्य आर्थिकस्थितिं सुदृढीकर्तुं एषा योजना प्रारब्धा अस्ति। सः अवदत् यत् एततपूर्वं कस्यापि सर्वकारेण मत्स्यजीवीपरिवाराणां कल्याणस्य विषये चिन्ता न कृता। शासनस्य वास्तविकपरिवर्तनस्य अर्थः एवम् अस्ति यत् समाजस्य प्रत्येकस्य वर्गस्य राज्यस्य संसाधनेषु समानः अधिकारः भवेत्।

## मत्स्यजीवीपरिवाराणां सम्मानाय योजना

मुख्यमन्त्री अवदत् यत् अस्याः योजनायाः माध्यमेन मत्स्यजीवीपरिवाराः सम्मानपूर्वकं स्वाभिमानेन च जीवनं यापयितुं शक्नुवन्ति। अपरं च राज्यसर्वकारेण मत्स्याय न्यूनतमसमर्थनमूल्यमपि प्रदत्तम् अस्ति। यदि राजस्वहानि-अनुदानम् (आर.डी.जी.) न निरुद्धं स्यात् तर्हि हिमाचलप्रदेशः वर्षे 2027 पर्यन्तम् आत्मनिर्भरः अभविष्यत्। तथापि हिमाचलप्रदेशं आत्मनिर्भरतातः प्रति शीघ्रतरं नेतुं राज्यसर्वकारः निरन्तरं प्रयतमानः अस्ति। प्रदेशाय वर्षे 1952 तः आर.डी.जी. प्राप्ता भवति स्म, किन्तु केन्द्रसर्वकारेण तस्याः निरोधात् राज्यस्य प्रतिवर्षं प्रायः 8,000 तः 10,000 कोटिरूप्यकाणां वित्तीयहानिः भवति।

## मुख्यमन्त्रिणः स्वपरिवारः सुखीपरिवारः' योजना

मुख्यमंत्री सुक्खुः अवदत् यत् राज्यसर्वकारः अस्मिन् वर्षे 2 अक्तूबरदिने सोलन-मण्डलात् मुख्यमन्त्रिणः स्वपरिवारः सुखीपरिवारः योजना प्रारप्स्यते। सः अवदत् यत् एतादृशानां प्रायः 90,000 परिवाराणां चयनं कृतम् अस्ति, येषां कृते अद्यावधि कस्यापि शासकीयकल्याणयोजनायाः लाभः न प्राप्तः। अस्याः योजनायाः अन्तर्गतं प्रायः द्विलक्षपरिवाराणां कृते सहायता प्रदास्यते। एतेषां परिवाराणां महिलाभ्यः प्रतिमासं 1,500 रूप्यकाणां निवृत्तिवेतनेन सह 300 यूनिट निःशुल्कविद्युदपि प्रदास्यते।

## पूर्वभाजपासर्वकारे धनस्य दुरुपयोगस्य आरोपः-

मुख्यमन्त्री अवदत् यत् पूर्वभाजपासर्वकारस्य कार्यकाले शासकीयधनस्य दुरुपयोगः कृतः। सोलनमण्डलस्य बद्दीक्षेत्रे प्रायः 5,000 बीघाभूमिः भाजपायाः समीपस्थेभ्यः उद्योगपतिभ्यः कस्टमाइज्ड- पैकेज- अन्तर्गतं पञ्जीकरणं विना आबण्टिता। राज्यसर्वकारः एतेषां भूम्यावण्टनानां निरस्तीकरणस्य विषये विचारं करोति। यदि आबण्टितभूमौ किमपि कार्यं प्रारब्धं नास्ति, तर्हि तस्याः आवण्टनं निरस्तं करिष्यते।

## हिमकेयर-योजनायां अनियमिततायाः आरोपः

पूर्वभाजपासर्वकारस्य कार्यकाले प्रवर्तितायाः हिमकेयर-योजनायाः उल्लेखं कुर्वन् मुख्यमन्त्री अवदत् यत् पुरुषाणाम् अण्डाशयस्य शल्यक्रियायाः बिलानि निर्मितानि, यत् महाघोटाला इत्यस्य संकेतं ददाति। सः अवदत् यत् काङ्गडा-विमानपत्तनस्य विस्तारसमये अनामी-व्यवहारोऽपि अभवत्। राज्यसर्वकारेण अस्य प्रकरणस्य अन्वेषणस्य आदेशाः प्रदत्ताः सन्ति तथा च यदि अनियमितताः प्रकाशन्ते तर्हि सम्बद्धभूमिः अधिगृहीत्वा निर्धनेभ्यः वितरिता भविष्यति। मुख्यमन्त्री प्रदेशस्य जनान् भ्रष्टाचारस्य विरुद्धे सर्वकारस्य संघर्षे सहयोगं कर्तुम् आहूतवान्।

## शिक्षाक्षेत्रे परिष्काराः, 6,000 नवीनशिक्षकपदानि

मुख्यमंत्री सुक्खुः अवदत् यत् वर्तमानराज्यसर्वकारः विद्यार्थिभ्यः तेषां गृहस्य समीपे गुणवत्तापूर्णशिक्षां प्रदातुं शिक्षाक्षेत्रे बहून् परिष्कारान् करोति। प्रदेशे 156 तः अधिकाः सी.बी.एस.ई. विद्यालयाः उद्घाटिताः सन्ति। तदतिरिक्तं विद्यालयेषु शिक्षकाणां 6,000 नवीनपदानि पूरितानि सन्ति। सः अवदत् यत् भाजपासर्वकारस्य कार्यकाले प्रदेशस्य चिकित्सामहाविद्यालयेषु केवलं 35 प्रतिशतं कर्मचारीबलम् उपलब्धम् आसीत्। वर्तमानराज्यसर्वकारेण 31 दिसम्बर, 2026 पर्यन्तं प्रदेशस्य सर्वेषु शासकीयचिकित्सामहाविद्यालयेषु 90 प्रतिशतं चिकित्सकीय- पैरा- मेडिकल- अन्यसहायककर्मचारिणां नियुक्तेः लक्ष्यं निर्धारितम् अस्ति, येन जनाः प्रदेशस्य अन्तरेव विशेषज्ञस्वास्थ्यसेवानां लाभं प्राप्तुं शक्नुयुः।

## विकासपरियोजनानां लोकार्पणं शिलान्यासश्च

एततपूर्वं मुख्यमन्त्री जसवां-परागपुरक्षेत्रस्य बाड्यां 95 लक्षरूप्यकाणां व्ययेन निर्मितस्य प्राथमिक-स्वास्थ्यकेन्द्रभवनस्य लोकार्पणं कृतवान्। सः अनेकासां अन्यविकासपरियोजनानां शिलान्यासमपि कृतवान्। तासु 1.80 कोटिरूप्यकाणां व्ययेन निर्मितव्यस्य राजकीय- वरिष्ठ-माध्यमिक- विद्यालयस्य, डाडासीबायाः विज्ञानखण्डस्य शिलान्यासोऽपि सम्मिलितः अस्ति। तदतिरिक्तं जसवां-प्रागपुरक्षेत्रे 4.85 कोटिरूप्यकाणां व्ययेन विभिन्नपथकार्याणां तथा 37 लक्षरूप्यकाणां व्ययेन अलोह्-नगरे स्वास्थ्योपकेन्द्रभवनस्य निर्माणस्य शिलान्यासोऽपि कृतः।

## प्राकृतिककृषकाणां कृते न्यूनतमसमर्थनमूल्यम्-

राज्ययोजनाबोर्डस्य उपाध्यक्षः भवानीसिंहपठानिया अवदत् यत् हिमाचलप्रदेशस्य प्रतिव्यक्ति-आयम् देशस्य अनेकभागानां तुलनायाम् उत्तमः अस्ति। तथापि प्रदेशस्य निम्नक्षेत्रेषु तुलनात्मकरूपेण न्यूनां प्रतिव्यक्तिं दृष्ट्वा राज्यसर्वकारेण प्रथमवारं प्राकृतिककृषिं कुर्वद्भ्यः कृषकेभ्यः न्यूनतमसमर्थनमूल्यं प्रदत्तम् अस्ति। सः अवदत् यत् मुख्यमन्त्री प्रदेशे सन्तुलितविकासं सुनिश्चितं कुर्वन् अस्ति तथा स्वास्थ्यं, शिक्षा, ग्रामीणार्थव्यवस्था च सर्वोच्चप्राथमिकतायै प्रदीयन्ते।

## विधायकस्य विकाससम्बद्धं कथनम्-

विधायकः सञ्जयरतनः अवदत् यत् राज्यसर्वकारः विकासस्य नूतनान् मानदण्डान् स्थापयति। प्रथमवारं कस्यापि सर्वकारेण मत्स्यपालकाणां कल्याणे विशेषं ध्यानं दत्तम् अस्ति। सः अवदत् यत् सम्पूर्णे हिमाचलप्रदेशे सन्तुलितविकासः भवति तथा प्रथमवारं प्रदेशस्य निम्नक्षेत्रसम्बद्धः काङ्ग्रेसस्य मुख्यमन्त्री राज्यस्य नेतृत्वं करोति। मुख्यमन्त्री प्रदेशस्य जनानां कल्याणाय पूर्णदृढतया प्रतिबद्धतया च कार्यं करोति।

## मत्स्यपालकाणां कल्याणाय नूतनः प्रयासः

काङ्ग्रेसनेता सुरेन्द्रमनकोटिया अवदत् यत् एततपूर्वं कस्यापि सर्वकारेण मत्स्यपालकेभ्यः पर्याप्तं ध्यानं न दत्तम्, येषु अधिकांशाः आर्थिकरूपेण दुर्बलवर्गेभ्यः सम्बद्धाः सन्ति। सः अवदत् यत् ठाकुरसुखविन्दरसिंहसुक्खोः एषा नूतना अनन्या च प्रयासः अस्ति। सः अवदत् यत् मुख्यमन्त्रिणा अनाथबालकानां कल्याणाय विधिः निर्मिता तथा प्राकृतिककृषेः प्रोत्साहनाय एम.एस.पी. प्रारब्धा। राज्यसर्वकारेण हरिद्रायै प्रतिकिलोग्रामं 150 रूप्यकाणां ऐतिहासिकं न्यूनतमसमर्थनमूल्यं घोषितम् अस्ति।



# नेपाल-विभीषिकातः शिक्षणम् - हिमालीय-टनल-सेतु-परियोजनानां भविष्यति तीक्ष्णं निरीक्षणम्, प्रधानमन्त्रिकार्यालयेन याचितं विवरणम्



**हिमसंस्कृतवार्ताः — नवदेहली/शिमला।**

नेपाले प्राकृतिक-आपदा-काले टनल-सेतु-क्षेत्रेषु सञ्जातेन नाशेन हिमालीय-राज्येषु बृहत्-मूलभूत-संरचना-परियोजनानां सुरक्षामधिकृत्य केन्द्र-सर्वकारस्य चिन्ता वर्धिता। प्रधानमन्त्रिकार्यालयेन (PMO) हिमाचलप्रदेश-सहितेषु हिमालीयेषु उत्तर-पूर्वीयेषु च राज्येषु निर्माणाधीनानां जलविद्युत्-परियोजनानां मार्ग-आन्तर्भौमिकमार्गाणां च सुरक्षा-व्यवस्थायाः समीक्षा प्रारब्धा। प्रधानमन्त्रिकार्यालयेन राज्येभ्यः विशेषतया एषा सूचना याचिता यत् पर्वतानां खनन-काले दुर्घटनाभ्यः प्राकृतिक-आपद्भ्यश्च रक्षणाय के के सुरक्षा-नियमाः अनुस्रियन्ते।
प्रधानमन्त्रिकार्यालयस्य (PMO) उपदेष्टुः तरुणकपूरस्य अध्यक्षतायां सम्पन्नायाम् उच्चस्तरीय-अन्तर्जाल-गोष्ठ्यां संवेदनशील-पर्वतीय-क्षेत्रेषु प्रचलन्त्याः आन्तर्भौमिक-निर्माण-स्थितेः विषये चर्चा संजाता। हिमाचल-पक्षतः अतिरिक्त-मुख्य-सचिवः आर.डी. नजीमः प्रधान-सचिवः देवेशकुमारश्च शिमलातः गोष्ठ्यां भागम् अगृह्णीताम्। नेपाल-दुर्घटनायाः सन्दर्भे निर्माण-काले विपदः न्यूनीकरणाय आपदा-स्थितौ च त्वरित-प्रतिसादं सुनिश्चितं कर्तुं राज्यात् प्रतिपुष्टिः स्वीकृता।

नदी-द्रोणीषु प्रायः द्वादश लघु-बृहत्-सेतवः जलविद्युत्-परियोजनाश्च सन्ति। बह्वीषु परियोजनासु जलस्य प्रवाहः आन्तर्भौमिक-माध्यमेन भवति, यदा तु कासुचित् परियोजनासु टनल-निर्माणम् अद्यापि प्रचलति। तथैव चण्डीगढ-शिमला तथा कीरतपुर-मनाली चतुष्पथ-मार्गेषु (Four-lane) बहवः आन्तर्भौमिकमार्गाः निर्मिताः सन्ति, केषुचित् भागेषु च निर्माणं प्रचलति। मटौर-शिमला तथा पठानकोट-मण्डी राष्ट्रिय-राजमार्गेषु अपि भारतीय-राष्ट्रिय-राजमार्ग-प्राधिकरणं (NHAI) टनल-परियोजनासु कार्यं कुर्वद् अस्ति। प्रधानमन्त्रिकार्यालयेन स्पष्टीकृतं यत् हिमालयस्य जटिलासु भूगर्भ-स्थितिषु कन्दरा-निर्माणं सामान्य-निर्माण-कार्यवत् न ग्रहीतव्यम्। खननात् पूर्वं निर्माण-काले च विस्तृत-भूगर्भीय-सर्वेक्षणम्, आधुनिक-शैल-आधार-प्रणाली, जल-स्रवणस्य निरीक्षणं, प्रत्यक्ष-समय-निरीक्षणं चेत्यादयः उपायाः प्रभावकारी-रीत्या अनुष्ठातव्याः। अस्य उद्देश्यम् एतदेव वर्तते यत् कस्यापि भूगर्भीय-सञ्चलनस्य, जल-स्रवणस्य, संरचनात्मक-दौर्बल्यस्य वा सङ्केतः समये एव प्राप्येत, महत्याः दुर्घटनायाः पूर्वमेव च आवश्यकाः उपायाः कर्तुं शक्येरन्।

# नीट-प्रश्नपत्र-प्रकटनस्य नियुक्ति-अनियमिततानां च विरुद्धं हिमाचले काङ्ग्रेस-पक्षः चालयिष्यति 'छात्राणां प्रतिध्वनिः' (छात्रों की गूँज) अभियानम्



**हिमसंस्कृतवार्ता — शिमला।**

नीट-प्रश्नपत्र-प्रकटन-सहितेषु अन्य-प्रतियोगि-परीक्षासु अनियमितता-प्रभृति-विषयेषु काङ्ग्रेस-दलस्य 'छात्राणां प्रतिध्वनिः' (छात्रों की गूँज) अभियानं प्रदेशे वेगं लप्स्यते। एतदर्थं प्रदेश-काङ्ग्रेस-समित्या पक्षस्य मण्डल-अध्यक्षेभ्यः निर्देशाः प्रसारिताः सन्ति। काङ्ग्रेस-दलं राष्ट्रिय-स्तरे लोकसभायाः विपक्षनेतुः राहुल-गान्धी-महोदयस्य नेतृत्वे एतत् अभियानं सञ्चालयति। प्रदेश-काङ्ग्रेस-अध्यक्षः विनयकुमारः अवदत् यत् दलस्य एतत् राष्ट्रियम् अभियानं राज्यस्य सर्वेषु मण्डलेषु प्रदेश-काङ्ग्रेस-पक्षः साफल्येन सम्पादयिष्यति। अपरपक्षे प्रदेश-काङ्ग्रेस-अध्यक्षः विनयकुमारः शनिवासरे भाजप-पक्षस्य उपरि पुनरेकवारं प्रहारम् अकरोत्। तेन आरोपः कृतः यत् भाजपा-दलं देशे धार्मिक-कट्टरतां स्पृश्यास्पृश्यतां च संवर्ध्य राष्ट्रिय-स्वयंसेवक-सङ्घस्य (RSS) विचारधारायाः आधारेण कार्यं करोति। काङ्ग्रेस-दलस्य राष्ट्रिय-अध्यक्षस्य मल्लिकार्जुन-खड्गे-महोदयस्य सभा-स्थलस्य शुद्धीकरणं भाजपा-सङ्घयोः अस्पृश्यतायाः धार्मिक-कट्टरपन्थिनः च विचारस्य प्रत्यक्षं प्रमाणं वर्तते, यत् कस्मिन्नपि स्तरे सोढुं न शक्यते।
विनयकुमारः काङ्ग्रेस-दलस्य वरिष्ठ-नेतुः पूर्व-राष्ट्रिय-अध्यक्षस्य विपक्षनेतुः राहुल-गान्धी-महोदयस्य तस्याः याचनायाः दृढं समर्थनम् अकरोत्, यस्यां तेन अस्य अपराधस्य दोषि-नेतॄणां विरुद्धं प्रथमा सूचना (FIR) पञ्जीकर्तुं याचना कृता। तेन आरोपः आरोपितः यत् भाजप-पक्षेण तेषां राष्ट्रिय-अध्यक्षस्य सहैव संविधानस्य अपि अपमानं कृतम्, अतः तैः देशात् अपि क्षमायाचना करणीया। तत्रैव विनयकुमारेण भाजपा-पक्षस्य उपरि देशे साम्प्रदायिक-सौहार्दं विलोपयितुं यत्नस्य आरोपः अपि कृतः।
तेन प्रोक्तं यत् काङ्ग्रेस-दलं प्रदेशे भाजप-पक्षस्य विरुद्धं नीट-प्रश्नपत्र-प्रकटनं, परीक्षासु नियुक्तिषु च अनियमितताः उद्यमहीनतां, शिक्षायाः व्यवसायीकरणं, देशस्य युवभ्यः भविष्येण सह क्रीडनं, राममन्दिर-समर्पण-राशि-चौर्यं (चंदा-चोरी) चेत्यादीन् गम्भीर-विषयान् जनतायाः न्यायालये प्रस्तोतुं गच्छति।

# राजकीय-आदर्श-शमशेर-वरिष्ठ-माध्यमिक-विद्यालय-नाहने संस्कृतसप्ताहस्य आयोजनम्

**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः।**

राजकीय-आदर्श-शमशेर-वरिष्ठ-माध्यमिक-विद्यालय-नाहने संस्कृतसप्ताहस्य पावन-अवसरे विविधाः आकर्षिकाः प्रतियोगिताः आयोजिताः। अस्मिन् विशेष-कार्यक्रमे विद्यालयस्य एकाविंशतिः (21) छात्र-छात्राः सोत्साहं भागं गृहीत्वा स्वकीयां कलां प्रतिभां च प्रादर्शयन् । अस्य सप्ताहस्य अन्तर्गतं विद्यालय-प्रांगणे शुभाशया पत्रप्रतियोगिता, (ग्रीटिंग कार्ड), संस्कृत-चित्रकला-प्रतियोगिता, भित्तिपत्र (पोस्टर मेकिंग) प्रतियोगिताः च आयोजिताः। अस्य कार्यक्रमस्य मुख्यम् उद्देश्यं छात्रान् देवभाषा-संस्कृतं प्रति जागरूकं करणम्, तान् च स्वकीयायाः प्राचीन-संस्कृतेः संस्काराणां च ज्ञानं कर्तुम् आसीत्। आयोजन-समये विद्यालयस्य प्रधानाचार्या कुसुम लता कौशलः, संस्कृत-शिक्षकः अमित शर्मा, संगीता ठाकुर च उपस्थितैः छात्रैः सह संवादं कुर्वन्तु । संस्कृतभाषायाः, अस्मत्-संस्कृतेः, जीवने संस्काराणां महत्त्वस्य विषये च ध्यानं दत्तवन्तः। ते सर्वेभ्यः छात्रेभ्यः आह्वानम् अकुर्वन् यत् ते स्वकीयांरवमयीं संस्कृतिम्, संस्कृतम्, संस्कारान् च जीवने धारयेयुः तथा च एतेषां प्रचार-प्रसारे योगदानं कुर्युः।




**प्रतियोगितानां परिणामः एवमस्ति:**

1. शुभाशया पत्रप्रतियोगिता (ग्रीटिंग कार्ड)
प्रथम-स्थानम्: दक्षः (दशमी कक्षा 'बी')
द्वितीय-स्थानम्: लक्ष्य शर्मा (दशमी कक्षा)
तृतीय-स्थानम्: आकृति शर्मा (दशमी कक्षा 'बी')
2. संस्कृत-चित्रकला प्रतियोगिता:
प्रथम-स्थानम्: सौरभ चौहानः (दशमी कक्षा 'बी')
द्वितीय-स्थानम्: सचिन चौहानः (सप्तमी कक्षा)
तृतीय-स्थानम्: दीपकः (दशमी कक्षा 'बी')
3. भित्तिपत्र (पोस्टर मेकिंग) प्रतियोगिता:
प्रथम-स्थानम्: आदित्य सिंहः (नवमी कक्षा 'ए')
द्वितीय-स्थानम्: चिराग शर्मा (नवमी कक्षा 'ए')
तृतीय-स्थानम्: अरविन्दः (दशमी कक्षा 'बी')

# संस्कृतसप्ताहमुपलक्ष्य संस्कृतभाषणादिविविधस्पर्धानाम् आयोजनम्







**हिमसंस्कृतवार्ता, मणिपुरम्।**

मणिपुरस्थितेन राधामाधव-आदर्श-संस्कृत-महाविद्यालयेन संस्कृतसप्ताहमुपलक्ष्य २७/०८/२०२६ दिनाङ्के गुरुवासरे विविधाः स्पर्धाः समायोजिताः। तासु संस्कृतभाषणस्पर्धा, मणिपुरीभाषणस्पर्धा, योगसूत्रकण्ठपाठस्पर्धा, योगासन-स्पर्धा तथा गीताकण्ठपाठस्पर्धा इत्येताः प्रमुखाः आसन्। अस्मिन् कार्यक्रमे बहिर्भागात् दशभ्यः विद्यालयेभ्यः समागत्य पञ्चपञ्चाशत् छात्राः सोत्साहं सर्वासु स्पर्धासु भागम् अगृह्णन्। छात्राणां सहभागिता अत्यन्तं प्रशंसनीया आसीत्। विविधासु स्पर्धासु छात्रैः स्वप्रतिभायाः उत्कृष्टं प्रदर्शनं कृतम्। अयं कार्यक्रमः महाविद्यालयस्य प्राचार्यस्य प्रो. बुद्धेश्वरषडङ्गिवर्यस्य सम्प्रेरणया महता उत्साहेन समायोजितः। कार्यक्रमस्य उद्घाटनसत्रे मुख्यातिथिरूपेण डॉ. मुक्तसिंहमहोदयः उपस्थितः आसीत्। अध्यक्षरूपेण च डॉ. ओपेन्द्रमैतेयमहोदयः उपस्थितः आसीत्। कार्यक्रमस्य समन्वयकत्वेन डॉ. प्रदीपकुमारदीक्षित-डॉ. सुकान्तप्रामाणिक-महोदयौ महत्त्वपूर्णं दायित्वं निरूढवन्तौ। महाविद्यालयस्य अन्ये सर्वेऽपि अध्यापकाः सोत्साहं कार्यक्रमस्य सफलतायै महत्त्वपूर्णं सहयोगम् अकुर्वन्। समापनसत्रे महाविद्यालयस्य प्राचार्यस्य प्रो. बुद्धेश्वरषडङ्गिमहोदयस्य करकमलाभ्यां विजेतृभ्यः छात्रेभ्यः पुरस्काराः प्रदत्ताः। प्राचार्यमहोदयेन छात्राणां प्रतिभायाः प्रशंसा कृता तथा भविष्येऽपि संस्कृताध्ययने संस्कृतसम्बद्धासु विविधासु गतिविधिषु च सक्रियतया भागं ग्रहीतुं छात्राः प्रेरिताः। एवं संस्कृतसप्ताहमुपलक्ष्य आयोजितः अयं कार्यक्रमः छात्राणां मध्ये संस्कृतभाषां, योगं, भगवद्गीतां च प्रति रुचिं वर्धयन् अत्यन्तं सफलतया सम्पन्नः।



# "अग्रे वृत्तिनां सृष्टिः सम्पूर्णे ग्रामीणभारते स्वास्थ्ये

## शिक्षाक्षेत्रेषु अन्यक्षेत्रेषु च भविष्यन्ति"

रविः खरिडेहालः - बेङ्गलूरु।

बृहत्परिमाणेन वृत्तिसृजनस्य अग्रिमे चरणे ग्रामीणक्षेत्रेषु स्वास्थ्यशिक्षाक्षेत्रेषु च ध्यानं भवितुमर्हति । वृत्तिवृद्ध्या सह अर्थव्यवस्थायाः वृद्धिः अग्रे गन्तुं मार्गः भवेत् | तत् ग्राम्यभारतेषु बृहत् उद्यमशीलतायाः सह सम्भवति। केन्द्रप्रदेशसर्वकारयोः निष्कर्षः प्राप्तः यत् वृत्तिसृजनाय उद्यमशीलतां प्रोत्साहयितव्या। व्यावसायिकरूपेण व्यवहार्यस्य उद्यमशीलतायाः अतीव महता आवश्यकता वर्तते । आरब्ध-संस्थानां कृते उत्पादानाम् निर्माणाय, विपण्य-प्रवेशाय च संसाधनानाम् आवश्यकता भवति । संसाधनरूपेण आरब्ध-संस्था प्रौद्योगिक्या, सुशासनेन, वित्तेन च सुसज्जिताः भवितुमर्हन्ति । हस्तशिल्पं, हस्तकरघा, कृषिं दुग्धं च एकीकृत्य, पुष्पकृषिम्, उद्यानं च इति नूतनं आयामं दातव्यम् । ग्रामीणपर्यटनं वृत्तिसृजनार्थं एतादृशी अन्यतमा सम्भावना अस्ति।

# प्रो. सञ्जयकुमारचौधरी-महोदयेन राष्ट्रीयशिक्षा-नीतिः (NEP)-२०२० इत्यस्य अभिमुखीकरण-

## संवेदीकरणकार्यक्रमस्य आधिकारिक-प्रचारपत्रकस्य (फ्लायर्) विमोचनं कृतम्



दरभङ्गा, २९ अगस्त २०२६। राघव नाथ झा

ललितनारायणमिथिलाविश्वविद्यालयस्य (LNMU) कुलपतिना प्रो. सञ्जयकुमारचौधरी-महोदयेन शनिवासरे राष्ट्रीयशिक्षानीति (NEP)-२०२० इत्यस्य अभिमुखीकरण-संवेदीकरणकार्यक्रमस्य (ओरिएण्टेशन् एण्ड् सेन्सिटाइजेशन्) आधिकारिक-प्रचारपत्रकस्य (फ्लायर्) विमोचनं कृतम्। अयं कार्यक्रमः ८ तः १६ सितम्बर २०२६ पर्यन्तं दक्षिणबिहारकेन्द्रीयविश्वविद्यालयस्य (गया) मालवीय-मिशन-शिक्षकप्रशिक्षणकेन्द्रस्य (MMTTC) तथा ललितनारायणमिथिलाविश्वविद्यालयस्य संयुक्ताश्रये गूगल-मीट्-माध्यमेन अन्तर्जालपुटे (ऑनलाइन) आयोजितः भविष्यति। प्रचारपत्रकस्य विमोचनावसरे कुलपतिः प्रो. सञ्जयकुमारचौधरी अवदत् यत् राष्ट्रीयशिक्षानीतिः-२०२० भारतीयायाम् उच्चशिक्षाव्यवस्थायां गुणात्मकपरिवर्तनस्य आधारशिला वर्तते। सः विश्वासं प्राकटयत् यत् विश्वविद्यालयस्य प्राध्यापकानां शोधच्छात्राणां च सक्रिया सहभागिता इमं कार्यक्रमं सफलं विधास्यति तथा च शिक्षणे, अनुसन्धाने, शैक्षणिकनेतृत्वे च नूतनान् आयामान् स्थापयिष्यति। अस्मिन् अवसरे आईक्यूएसी-निदेशकः डॉ. एम्. ज्या हैदरः, एनईपी-समन्वयकः डॉ. सङ्केतकुमारझा, अमृतकुमारझा, डॉ. अतानुबनर्जी, विश्वविद्यालयस्य अधिकारिणः, अन्ये च शिक्षाविदः उपस्थिताः आसन्। उपस्थितैः सदस्यैः एषः उपक्रमः राष्ट्रीयशिक्षानीतेः प्रभावशालिक्रियान्वयनस्य दिशि एकं महत्त्वपूर्णं पदं वर्णितम्। विश्वविद्यालयेन सूचितं यत् कुलपतेः प्रो. सञ्जयकुमारचौधर्यस्य नेतृत्वे ल.ना.मि.वि. शैक्षणिकगुणवत्तायाः, अनुसन्धानसंस्कृतेः, राष्ट्रीय-शिक्षानीतेः प्रभावि-क्रियान्वयनस्य संस्थागतविकासस्य च क्षेत्रे निरन्तरं नूतनोपलब्धीः प्राप्नोति। विश्वविद्यालयः उच्चशिक्षायां नवीनताम्, बहुविषयकशिक्षां, शिक्षकाणां क्षमताविकासं च प्राधान्यं दत्त्वा राष्ट्रियस्तरे स्वपरिचयं दृढं करोति। उल्लेखनीयं वर्तते यत् ल.ना.मि.वि. २०२५ तमे वर्षे अपि ३० मे तः ७ जून् पर्यन्तम् एतादृशमेव राष्ट्रीयशिक्षानीति-२०२० अभिमुखीकरण-संवेदीकरण-कार्यक्रमं साफल्येन आयोजितवान् आसीत्, यत्र शिक्षकाणां शोधच्छात्राणां च विपुला सहभागिता प्रशंसा च प्राप्ता आसीत्। तामेव सफलताम् अनुसृत्य अस्मिन् वर्षे पुनः अयं कार्यक्रमः आयोज्यते। अयं कार्यक्रमः अष्टकार्यदिवसानाम् ऑनलाइन-संकायविकासकार्यक्रमः (FDP) भविष्यति, यस्मिन् रविवासरे अवकाशः भविष्यति। प्रतिदिनं द्वौ शैक्षणिकसत्रौ आयोजितौ भविष्यतः। प्रथमं सत्रं प्रातः १०:०० वादनतः ११:३० वादनपर्यन्तं तथा द्वितीयं सत्रं ११:४५ वादनतः मध्याह्ने १:१५ वादनपर्यन्तं प्रचलिष्यति। अस्य आयोजनं गूगल-मीट्-माध्यमेन भविष्यति। अयं प्रशिक्षणकार्यक्रमः उच्चशिक्षणसंस्थानां सर्वविषयाणां शिक्षकेभ्यः, ग्रन्थपालाय (पुस्तकालयाध्यक्षेभ्यः), शोधच्छात्रेभ्यः, अनुसन्धान-सहायकेभ्यः च सर्वथा निःशुल्कः अस्ति। अस्य कार्यक्रमस्य उद्देश्यं राष्ट्रीयशिक्षानीतेः-२०२० मूलभावं व्यावहारिकरूपेण अवबोधयितुं तथा शिक्षकान् समकालीनशैक्षणिक-आवश्यकतानुरूपं सबलीकर्तुं वर्तते। अस्मिन् भारतकेन्द्रितशिक्षा, भारतीयज्ञानपरम्परा, बहुविषयकशिक्षा, आलोचनात्मकचिन्तनं, नवीनता, उद्यमिता च इत्याद्यनेकेषु विषयेषु विशेषज्ञव्याख्यानानि आयोज्यन्ते। पञ्जीकरणार्थं प्रतिभागिभिः एमएमटीटीसी-जालपुटे (MMTTC portal) 'Central University of South Bihar, Gaya' इति प्रशिक्षणकेन्द्ररूपेण चोतव्यम्। पञ्जीकरणस्य अन्तिमा तिथिः ७ सितम्बर २०२६ निर्धारिता, सायं ५:०० वादनपर्यन्तं च पञ्जीकरणस्य पुष्टीकरणम् आवश्यकं भविष्यति। सक्रियसहभागितां ऑनलाइन-मूल्याङ्कनं च पूरयितृभ्यः प्रतिभागिभ्यः ई-प्रमाणपत्रं प्रदास्यते, यत् कैरियर-एडवांसमेण्ट्-स्कीम् (CAS) इत्यस्य अन्तर्गतम् अपि मान्यं भविष्यति। विश्वविद्यालयप्रशासनेन सर्वेभ्यः शिक्षकेभ्यः, ग्रन्थपालेभ्यः, शोधच्छात्रेभ्यः, उच्चशिक्षणसंस्थानां शैक्षणिकसमुदायेभ्यः च अस्मिन् राष्ट्रीयकार्यक्रमे अधिकाधिकसंख्यायां प्रतिभागं कर्तुम् आह्वानं कृतम्। विविधासु गतिविधिषु च सक्रियतया भागं ग्रहीतुं छात्राः प्रेरिताः। एवं संस्कृतसप्ताहमुपलक्ष्य आयोजितः अयं कार्यक्रमः छात्राणां मध्ये संस्कृतभाषां, योगं, भगवद्गीतां च प्रति रुचिं वर्धयन् अत्यन्तं सफलतया सम्पन्नः।



# “गुरुकुलं केवलं शिक्षाकेन्द्रं न, अपि तु भारतीयसंस्कृतेः, सदाचारस्य, चरित्रनिर्माणस्य च जीवन्तपरम्परा- "विधायकः महन्तदिलीपरावतः"

## श्रीसिद्धबली- गुरुकुल- संस्कृत- विद्यालये भव्ययज्ञोपवीतसंस्कारस्य गरिमामयः समारोहः सम्पन्नः

**हिमसंस्कृतवार्ताः- कोटद्वारम्।**

श्रीसिद्धबलीधाम्नि कण्वनगरी-कोटद्वारे स्थिते श्रीसिद्धबली- गुरुकुल- संस्कृतविद्यालये बटुकानां यज्ञोपवीतसंस्कारः वैदिकरीत्या श्रद्धाभक्तिसमन्वितः भव्यतया सम्पन्नः। अस्मिन् पुण्यावसरे विद्यालयस्य संरक्षकः कोटद्वारविधायकश्च श्रीमहन्तदिलीपरावतः मुख्यसान्निध्येन उपस्थितः आसीत्। वेदमन्त्रध्वनिभिः, यज्ञेन, मङ्गलस्नानेन, भिक्षायाचनेन च सम्पूर्णं गुरुकुलपरिसरं आध्यात्मिक- वातावरणेन स्पन्दितम् अभवत्।

अवसरेऽस्मिन् अभिभावकैः सह आचार्यैः सह पूजनीयमंचे विधायकवर्येण सह डॉ. रमाकान्तकुकरेती, प्रधानाचार्यः अशोकजोशी, देवेन्द्रनौडियालः, अभिषेकडोबरियालः, संस्कृत-स्पर्धानां जनपदसंयोजकः रोशनगौडः, संस्कृतप्रचारकः कुलदीपमैन्दोला , सिद्धार्थनैथानी आदयः गण-मान्यजनाः, उपस्थिताः आसन्। कार्यक्रमस्य प्रारम्भे बटुकानां मङ्गलस्नानम् अभवत्। अभिभावकैः स्वपुत्रैः सह वैदिकविधिना पवित्रस्नानं विधाय उपनयनसंस्कारस्य शुभारम्भः कृतः। ततः आचार्याणां वेदघोषैः सह यज्ञोपवीतधारणसंस्कारः सम्पन्नः। अस्मिन् समये श्रीमहन्तदिलीप-रावतमहाभागेन स्वयमेव स्वस्तिवाचनम् उच्चार्य सर्वेषां बटुकानां मङ्गलमयं, धर्मनिष्ठं, तेजस्वी च जीवनं प्रार्थितम्। स्वीये

## यज्ञोपवीतसंस्कारः बालकस्य ज्ञान, अनुशासन, संयम, सेवाभावस्य च आरम्भसूचकः महान् संस्कारः अस्ति

प्रेरणादायके उद्बोधने श्रीमहन्तवर्येण उक्तं यत्- “गुरुकुलं केवलं शिक्षाकेन्द्रं न, अपि तु भारतीयसंस्कृतेः, सदाचारस्य, चरित्रनिर्माणस्य च जीवन्तपरम्परा अस्ति।” तेन प्रतिपादितं यत् यज्ञोपवीतसंस्कारः बालकस्य ज्ञान, अनुशासन, संयम, सेवाभावस्य च आरम्भसूचकः महान् संस्कारः अस्ति। नित्ययज्ञः, वेदाध्ययनम्, गुरुभक्तिः, संस्कृतसंरक्षणं च राष्ट्रस्य सांस्कृतिक- वैभवस्य मूलाधारः इति अपि तेन निरूपितम्।संस्कारोत्तरकाले परम्परानुसारं भिक्षायाचनम् आयोजिता। बटुकैः विनयपूर्वकं भिक्षा याचिता, अभिभावकैः श्रीमहन्तदिलीपरावतमहाभागेन च श्रद्धानुसारं दक्षिणा प्रदत्ता, शुभाशिषः समर्पिताः। एषः भावपूर्णः क्षणः गुरुपरम्परायाः पारिवारिक-संस्काराणां च अनुपमं दर्शनम् अभवत्। विद्यालयस्य प्रबन्धकः डॉ. रमाकान्तकुकरेती अवदत् यत् गुरुकुलस्य प्रमुखलक्ष्यं वेदस्य, संस्कृतस्य, यज्ञस्य तथा भारतीयजीवनमूल्यानां संरक्षणं संवर्धनं च अस्ति। प्रधानाचार्यः अशोकजोशी संस्कारयुक्तशिक्षायाः महत्त्वं प्रतिपादयन् उक्तवान् यत् संस्काराः एव श्रेष्ठसमाजस्य दृढाधारः सन्ति। आचार्यौ देवेन्द्रनौडियालः, अभिषेकडोबरियालः चापि स्वकीयवक्तव्येषु उपनयनसंस्कारस्य आध्यात्मिकं शैक्षिकं च महत्त्वं विस्तरेण निरूपितवन्तौ। कार्यक्रमस्य समापने सर्वे बटुकाः वैदिकाशिषा आशीर्वादिताः। अभिभावकैः गुरुकुलपरिवारस्य प्रति कृतज्ञता व्यक्तीकृता तथा एषः संस्कारः स्वसन्तानानां जीवनस्य अविस्मरणीयः क्षणः च प्रथमः अवसरः इति कथितम्।

# संस्कृतिस्रोतश्च प्रशिक्षणस्य केन्द्रीयसंस्थायाः देहल्याः अभिमुखीकरणपाठ्यक्रमे उत्तराखण्डदलस्य गौरवमयी उपलब्धिः



**हिमसंस्कृतवार्ताः- देहली।**

संस्कृतिस्रोतश्च प्रशिक्षणस्य केन्द्रीयसंस्थायाः (CCRT) देहल्यां आयोजिते एकविंशतिदिवसीये अभिमुखीकरणपाठ्यक्रमे उत्तराखण्डस्य शिक्षकदलम् आरभ्य समापनपर्यन्तं सर्वेषाम् आकर्षणस्य प्रशंसायाश्च केन्द्रं बभूव। अस्मिन् पाठ्यक्रमे भारतस्य षोडशराज्येभ्यः आगताः कुलम् ११५ शिक्षकाः सहभागित्वम् अकुर्वन्। कार्यशालायाः मुख्योद्देश्यः आसीत्- भारतीयायाः विराट-सांस्कृतिकपरम्परायाः परिचयप्रदानम्, आधुनिकशिक्षां भारतीयसंस्कृत्या, कलया च समन्वयः, विद्यार्थिनां सर्वाङ्गीणविकासस्य मार्गदर्शनम्। प्रथमदिवसादेव उत्तराखण्डदलस्य शिक्षकाः स्वकीयया पारम्परिकवेशभूषया, मधुरसंगीतप्रस्तुत्या, भाषाकौशलेन च अन्यराज्येभ्यः आगतानां शिक्षकेषु विशेषमाकर्षणं समुपाजनयन्। प्रतिदिनं आयोजितेषु विविधराज्यानां सांस्कृतिककार्यक्रमेषु अपि उत्तराखण्डदलम् उदारभावेन सर्वेभ्यः सहयोगम् अददात्। दलस्य नेतृत्वं कुर्वन् दिनेशचन्द्रपाठकः अवदत्- “अस्माकं कृते महदिदं गौरवम् आसीत् यत् अन्यराज्यानां शिक्षकाः अपि स्वकार्यक्रमाणां सफलतायै अस्माकं सहयोगम् अभ्यर्थयन्त।” सांस्कृतिककार्यक्रममालायाम् उत्तराखण्डदलस्य सदस्यैः सीसीआरटी इत्यस्य महामञ्चे ‘नन्दाराजजात’ इति लोकनाट्यस्य भावपूर्णं मंचनं कृतम्। अस्य अनुपमप्रस्तुतेः दर्शनमात्रेण दर्शकाः भावविभोराः अभवन् तथा भाषासंगीतम् अतिक्रम्य सर्वैः मुक्तकण्ठेन प्रशंसा कृताऽभूत्। कार्यशालायाः सम्पूर्णावधौ दिनेशचन्द्रपाठकः , हिमांशुजोशी, अशोककुमारः, जयन्तकुमारः च सांगीतिकपक्षं सम्यक् असम्भालयन्। अञ्जलीनेगीरिङ्कीसिंहः, रीना, सृष्टिबोरा च कला-नृत्ययोः स्वप्रतिभां प्रदर्शितवन्त्यः। हरीशसती, अखिलेश घिल्डियालः उत्कृष्टेन मञ्चसञ्चालनेन सर्वान् प्रभावितवन्तौ। केशवबिजल्वाणः, लोकेशसिंहः, अनिलकुमारत्रिपाठी, अरुणसेमल्टी, मनवीरभारती च नेपथ्ये तथा मञ्चे स्वकीयसर्वशैल्या विशिष्टां छविं प्रसारितवन्तः। समापनदिने भारतस्य प्रादेशिकभाषाणां गीतानि प्रस्तुतानि, यस्मिन् उत्तराखण्डदलस्य प्रमुखा भूमिका आसीत्। सीसीआरटी-संस्थायाः उपनिदेशकेन अपि मञ्चतः उत्तराखण्डदलस्य प्रस्तुतेः भूरिशः प्रशंसा कृता। समापनसमारोहे सर्वे शिक्षकाः संकल्पम् अकुर्वन् यत् कार्यशालायां अधीतं भारतीयसंगीतं, चित्रकला, शिल्पकला तथा प्राचीनसभ्यतायाः ज्ञानं स्वविद्यालयेषु विद्यार्थिभ्यः अवश्यम् हस्तान्तरयिष्यन्ति।



# संस्कृतस्य शास्त्रीयार्थतन्त्रे निहिताः सन्ति सेवार्थस्य बह्व्यः सम्भावनाः

**हिमसंस्कृतवार्ताः- पौडी**

हेमवतीनन्दनबहुगुणा- गढ़वाल- विश्वविद्यालयस्य (केन्द्रीय- विश्वविद्यालयस्य) डॉ. बी. जी. आर. परिसरे पौडीगढ़वाले आयोजिते संस्कृतसप्ताहस्य चतुर्थदिने "संस्कृतस्य शास्त्रीयार्थतन्त्रम्- वर्तमानार्थसेवायाः सन्दर्भे" सार्थकं ज्ञानवर्धकं च व्याख्यानम् अभवत्। अस्मिन् कार्यक्रमे संस्कृतस्य शास्त्रीयज्ञानस्य आधुनिकार्थसेवायाः सम्भावनाभिः सह सम्बन्धः प्रमुखतया प्रतिपादितः। मुख्यवक्ता डॉ. कञ्चनतिवारी, उत्तराखण्ड- संस्कृत- विश्वविद्यालयस्य हरिद्वारस्थित- साहित्यविभागस्य सहायकाचार्यः, स्वव्याख्याने उक्तवान् यत् संस्कृतसाहित्ये शास्त्रेषु च अर्थस्य अवधारणा विस्तृतरूपेण विवेचिता अस्ति। तया प्रतिपादितं यदर्थः जीवनस्य अनिवार्यः पुरुषार्थः अस्ति, किन्तु भारतीयदर्शने धर्मार्थकाममोक्षरूपेषु चतुर्षु पुरुषार्थेषु सः सर्वोच्चलक्ष्यं न भवति। अर्थस्य मर्यादितः सदुपयोगः एव शास्त्रीयपरम्परायाः मुख्यः सन्देशः इति तया निरूपितम्। कार्यक्रमस्य अध्यक्षतां प्रो. अनूपकुमारडोबरियालः, जन्तुविज्ञानविभागाध्यक्षः, अकरोत्। स्वाध्यक्षीयोद्बोधने तेन उक्तं यत् भारतीयचिन्तने अर्थस्य महत्त्वम् अवश्यं स्वीकृतम्, किन्तु सः जीवनस्य एकमात्रं लक्ष्यं नास्ति। संस्कृताध्ययनं समकालीनावश्यकताभिः सह संयोजयितुं आवश्यकता वर्तते इति तेन बलपूर्वकम् अभिहितम्। कार्यक्रमस्य वैदिकमङ्गलाचरणं धनञ्जयदेवराडी महोदयेन कृतम्। मञ्चसञ्चालनं डॉ. धर्मेन्द्रकुमारः, अङ्ग्रेजीविभागस्य सहायकाचार्यः, अत्यन्तं प्रभावपूर्णरीत्या सम्पन्नवान्। कार्यक्रमस्य संयोजकेन संस्कृतविभागाध्यक्षेन दिनेशचन्द्रपाण्डेय महोदयेन मुख्यवक्त्र्याः स्वागतं परिचयश्च प्रस्तुतः। समन्वयिकया प्रो. कुसुम डोबरियालमहोदयया सम्पूर्णस्य कार्यक्रमस्य व्यवस्थाः सुचारुरूपेण समन्विताः। समापनसत्रे डॉ. बालकृष्णबधानी (वेदान्ती) महोदयेन धन्यवादज्ञापनं कृतम्। तेन संस्कृताध्ययनस्य रोजगारपरकसम्भावनाः अपि प्रकाश्य सर्वेभ्यः सहयोगिभ्यः हार्दिकः कृतज्ञताभावः व्यक्तः। संस्कृतसप्ताहस्य चतुर्थदिवसः संस्कृतस्य शास्त्रीयज्ञानस्य, अर्थचिन्तनस्य, आधुनिकार्थसेवायाः अवसराणां मध्ये सार्थकसेतुनिर्माणे महत्त्वपूर्णः सिद्धोभवत्।

# संस्कृतभारत्याः जोरहाट-जनपदस्य विश्वसंस्कृतदिवसस्य आयोजनम्



**हिमसंसकृतवार्ता - जोरहाटम्, २८ अगस्तः** पवित्रा श्रावणी पूर्णिमा। अस्यां पूर्णिमातिथौ प्रतिवर्षं सम्पूर्णदेशे विश्वसंस्कृतदिवसः सम्पाद्यते। तस्यैवाङ्गत्वेन अद्य जोरहाट-जनपदस्य मधुकरभवने विश्वसंस्कृतदिवसः सोत्साहं परिपालितः। संस्कृतभारत्याः जोरहाट- जनपदशाखायाः संयोजकः जयन्तदासशास्त्रिमहोदयस्य सञ्चालने अस्य कार्यक्रमस्य शुभारम्भः ध्येयमन्त्रपाठेन अभवत्। अस्मिन् कार्यक्रमे विशिष्टातिथीनां रूपेण गड़मूर- शङ्करदेव- शिशुनिकेतनस्य प्राक्तना प्रधानाचार्या माननीया वर्णाली बरुवा, संस्कृतप्रेमी अच्युत् बरा, जोरहाट- अभियान्त्रिक- महाविद्यालयस्य प्राक्तना अध्यापिका डॉ. नित्याञ्जली भट्टाचार्या, जगन्नाथबरुवा- विश्वविद्यालयस्य संस्कृतविभागस्य अध्यापिका डॉ. स्वप्ना बरा, आउनीआटी- विश्वविद्यालयस्य अध्यापकः रूपमशास्त्री, देवीचरणबरुवा- बालिका- महाविद्यालयस्य संस्कृतविभागस्य अध्यापिका डॉ. मधुस्मिता डेका, जोरहाट- नगरस्य कार्यवाहः प्राणदीपशर्मा, संस्कृतभारत्याः उत्तरासमप्रान्तस्य महाविद्यालयानां कार्यप्रमुखः अनिर्वाण शर्मा, विश्वहिन्दूपरिषदः जोरहाट- जनपदस्य सम्पादकः राजु बरा इत्येतेषां सह विकास बर्ठाकुर, पुलकेश बरुवा, भास्कर बरुवा, बरषा बरा, डिम्पी गायन-प्रभृतयः बहवः संस्कृतानुरागिणः उपस्थिताः आसन्। अस्मिन् कार्यक्रमे संस्कृतगीतानि, श्लोकपाठाः तथा च सामूहिकरूपेण राष्ट्रगीतं "वन्दे मातरम्" इति प्रस्तूयन्ते स्म। अन्ते जोरहाट-जनपदस्य ग्रामेषु च संस्कृतभाषायाः प्रचाराय प्रसाराय च सर्वैः सहमतिः प्रकटीकृता, कल्याणमन्त्रपाठेन च अस्य विश्वसंस्कृतदिवस-कार्यक्रमस्य समापनम् अभवत्।



# हुगलीनगरे डी.पी.एस. बोकारो-विद्यालयस्य बालकराटे-क्रीडकैः प्रदर्शिता उत्कृष्टा प्रतिभा, राष्ट्रिय-प्रतियोगितायां चत्वारः पदकाः प्राप्ताः

**हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो।** कराटे एसोसिएशन ऑफ इण्डिया (के.ए.आई.) इत्यनेन सम्बद्धस्य ऑल बंगाल स्पोर्ट्स कराटे- डो- एसोसिएशन इत्यस्य आतिथ्ये पश्चिमबङ्गस्य हुगलीनगरे आयोजितायां राष्ट्रिय- कराटे- चैम्पियनशिप- 2026 इति प्रतियोगितायां दिल्ली पब्लिक स्कूल (डी.पी.एस.) बोकारो-विद्यालयस्य बालकराटे-क्रीडकैः उत्कृष्टं प्रदर्शनं कृत्वा झारखण्ड- राज्यस्य दलस्य पक्षतः गौरवपूर्णा सहभागिता प्रदर्शिता। के. ए. आई. सब-जूनियर, कैडेट, जूनियर कराटे- चैम्पियनशिप- 2026 इत्यस्य अन्तर्गतं विद्यालयस्य छात्रः अक्षरकुमारः सब-जूनियर बालकानां 8–9 वर्षवर्गस्य 25 किलोग्राम कुमिते- विभागे रजतपदकं प्राप्तवान्। प्रथम- उपविजेतृत्वं प्राप्तवान्। अस्मिन्नेव आयुवर्गे 30 किलोग्राम कुमिते- विभागे मायोनशारवः अपि उत्कृष्टं प्रदर्शनं कृत्वा द्वितीयस्थानं प्राप्य रजतपदकं प्राप्तवान्। तथैव सब-जूनियर बालिकानां 10–11 वर्षवर्गस्य काताविभागे छात्रा भाव्या बिष्ट कांस्यपदकं प्राप्तवती। द्वितीय-उपविजेतृत्वं प्राप्तवती। सब- जूनियर बालकानां 8–9 वर्षीय-वर्गस्य 35 किलोग्रामात् अधिकभारस्य कुमिते-विभागे विद्यालयस्य छात्रः आरवकुमारः तृतीयस्थानं प्राप्य कांस्यपदकस्य विजेता अभवत्।

विद्यालयस्य प्राचार्यः, स्पोर्ट्स कराटे एसोसिएशन ऑफ झारखण्ड इत्यस्य च अध्यक्षः डा. ए. एस. गंगवारः उक्तानां बालकराटे-क्रीडकानां उल्लेखनीयप्रदर्शने प्रसन्नतां व्यक्तवान्। सः एतद् विद्यालयस्य, बोकारो-जनपदस्य, सम्पूर्णस्य झारखण्ड- राज्यस्य कृते गौरवपूर्णा उपलब्धिः इति उक्तवान्। सः चतुर्णां विद्यार्थिनां मेडल-प्रदानेन सम्मानं कृत्वा तेषां उज्ज्वलभविष्यस्य कामनां कृतवान्।डा. गंगवारः कराटेक्रीडाम् आत्मरक्षणस्य सशक्तं साधनम् इति प्रतिपादितवान्। तेन उक्तं यत् कराटे-क्रीडया विद्यार्थिनां शारीरिकं मानसिकं च विकासः भवति। तेषु अनुशासनस्य आत्मविश्वासस्य च भावना अपि वर्धते।

# "संस्कृतकथामञ्जरी" {१०}

# ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

# "अथ कृतज्ञतापरीक्षणं नाम चतुर्थोपाख्यानम्" (२)

भवतु तावत्, राजा एवं यत् वदति, तत् सत्यं वा मिथ्या वा अस्या प्रत्यया द्रष्टव्यः इति विचिन्त्य, राजकुमारं केनाप्यविदितं स्वमन्दिरे सङ्गोप्य तस्यालङ्कारं भृत्यहस्ते दत्त्वा नगरमध्ये विक्रयार्थं प्रेषितवान्। तस्मिन् अवसरे राजमन्दिरे राजपुत्रः केनापि चौरेण अपहृतः इति महान् कोलाहलो जातः। राज्ञाऽपि स्वपुत्रमार्गणाय सर्वेऽधिकारिणः प्रेषिताः। ततस्ते यावद्विपणिमध्ये विलोकयन्ति तावदाभरणहस्तो देवदत्तभृत्यो दृष्टः। ततस्तदाभरणं राजकुमारस्येति ज्ञात्वा तं बद्ध्वा राजसकाशं निन्युः। पश्चात् भृत्याः कथयन्ति स्म-

रे पापाचार! कथमेतदाभरणं तव हस्ते समागतम्? तेनोक्तं- मम हस्ते देवदत्तेन ब्राह्मणेन दत्तं, तस्याहं भृत्यः इति विपणिमध्ये एतदाभरणविक्रयेण धनमानय इति कथितञ्च। ततो राज्ञा देवदत्त आकारितः भणितश्च- भो देवदत्त! एतदाभरणं तव हस्ते केन दत्तम्? देवदत्तेनोक्तं- न केनाऽपि दत्तम्, अहमेव धनलोलुपः तव कुमारं हत्वा तदाभरणानि सर्वाणि गृहीत्वा, तन्मध्ये इदमेकमाभरणमस्य हस्ते विक्रेतुं दत्तवान्। इदानीं तुभ्यं यद्रोचते तत्कुरु। मम कर्मवशादेवंविधा बुद्धिरभूत् इति भणित्वा अधोमुखो बभूव। तद्वचनं श्रुत्वा राजा तूष्णीमवस्थितः। तदा सभामध्ये केचिदुक्तम्- अहो! अयं सर्वधर्मशास्त्रवेत्ताऽपि कथमीदृशे पापकर्मणि बुद्धिमकरोत्? अन्येनोक्तं- किं चित्रम्! स्वकर्मणा प्रेरितस्यैवं बुद्धिर्जाता। तत्र सभ्यैर्भणितं- भो राजन्! अयं बालघातौ, पुनः स्वर्णस्तेयो च, अतः खादिरेण शूलेन हन्तव्यः। ततः अन्यैर्मन्त्रिभिरुक्तम्- अमुं शतखण्डं कृत्वा अस्य मांसेन गृधाणां बलिः दातव्यः इति।

तेषां वचनं श्रुत्वा राज्ञा भणितं- भोः सभ्याः! अयं ममाश्रितः, पुरा मार्गदर्शनादुपकारी च; अतः सत्पुरुषेण आश्रितानां गुणदोषचिन्ता न कार्या। इत्युक्त्वा देवदत्तं प्रति भणति स्म- भो देवदत्त! त्वं चेतसि किमपि भयं मा कार्षीः। मम पुत्रो बलीयसा प्राक्तनेन कर्मणा मारितः त्वया किं कृतम्? यतः प्राकृतं कर्म कोऽपि लङ्घयितुं न शक्नोति। अन्यच्च महारण्ये पतितं मां नगरं नीतवतो महोपकारिणः तव प्रत्युपकारसहस्रैरप्युत्तीर्णो न भवामि इति समाश्वास्य वस्त्राभरणादिना देवदत्तं सम्भाव्य विससर्ज। ततः देवदत्तः तं कुमारमानीय राज्ञे ददौ। ततः सविस्मयेन राज्ञा भणितं- किमिदम्! इति। देवदत्तेन उक्तं- कृतोपकारात् कथमपि उत्तीर्णो न भवामीति पूर्वं श्रीमतोक्तम्! तद्भवतः स्वभावपरीक्षणार्थं मया एव कृतम्। राज्ञा उक्तं- यः कृतमुपकारं विस्मरति स पुरुषाधम एव। देवदत्तेनोक्तं- भो राजन्! कारणं विनाऽपि सकलजगदुपकारी भवान्। अतस्त्वमेव सुजनो लोके। तथा चोक्तम्-

**"सुजनाः सुधनास्ते हि कृतिनः सुखिनस्तथा।**
**जन्तवो ये हि जीवन्ति परस्य हितकाम्यया।।"**

इति कथां कथयित्वा पुत्तलिका राजानमवदत्- एवं परोपकार्यौदार्याणि विद्यन्ते चेत् त्वयि, तर्हि अस्मिन् सिंहासने समुपविश। भोजराजः तूष्णीमासीत्।

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# नवीनशिक्षानीतौ संस्कृतस्य भविष्यं च इति विषये व्याख्यानगोष्ठी सम्पन्ना




हिमसंस्कृतवार्ताः- लखनऊम्, उत्तरप्रदेश।उत्तरप्रदेश-संस्कृतसंस्थानेन स्वपरिसरे २९ अगस्त २०२६ दिनाङ्के 'नवीनशिक्षानीतिः संस्कृतस्य भविष्यं च' इति विषयमधिकृत्य व्याख्यानगोष्ठ्याः आयोजनं कृतम्। कार्यक्रमस्य प्रारम्भः दीपप्रज्वलनेन माल्यार्पणेन च अभवत्। ततः मुख्यातिथीनां वाचिकं स्वागतं कृतम्। संस्थानस्य वरिष्ठप्रशासनिकाधिकारी दिनेशकुमारमिश्रः स्वीयोद्बोधने सर्वेषां वक्तॄणां स्वागतं कृत्वा शासनस्य विभिन्नानां योजनानां विषये जानकारीं प्रदत्तवान्। संस्कृतभाषायाः प्रचार-प्रसाराय अधिकप्रयत्नस्य आवश्यकतायां च तेन विशेषं बलं दत्तम्। कार्यक्रमे मुख्यवक्तारूपेण प्रो. सदाशिवकुमारद्विवेदी, कलासंकायः, काशी- हिन्दू- विश्वविद्यालयः, वाराणसी, उपस्थितः आसीत्। सः अवदत् यत् नवीनशिक्षानीतेः प्रमुखमुद्देश्यं संस्कृतभाषायां निहितं ज्ञानं सर्वेषां विषयाणां विद्यार्थिभ्यः सरलतया प्रापयितुम् अस्ति। एस. ए. सी., वी. ए. सी., एम. डी. तथा माइनर इत्यादीनां पाठ्यक्रमाणां लाभं संस्कृतेतरविषयाणां विद्यार्थिनः अपि गृह्णन्ति। एतेषु विज्ञानं, सामाजिकविज्ञानं, वाणिज्यं, प्रबन्धनम् इत्यादयः विषयाः अन्तर्भवन्ति। प्रो. द्विवेदी उक्तवान् यत् संस्कृतभाषायां निहितं ज्ञानं सरलप्रभावीरीत्या विद्यार्थिषु प्रस्तुतं संस्कृतप्राध्यापकानां दायित्वम् अस्ति। विषयान् तार्किकरूपेण प्रस्तुतं नूतनाः विधयः विकसितव्याः। संस्कृतग्रन्थेषु विद्यमानानां आधुनिकविषयसम्बद्धानां सूत्राणां विद्यार्थिभ्यः परिचयः करणीयः। विषयज्ञानस्य सहैव विद्यार्थिनां जीवनं संस्कारपूर्णं भवेत्, तदर्थमपि भारतीय- ज्ञान-परम्परायाः सूत्राणि तेषां समक्षं स्थापनीयानि इति तेन प्रतिपादितम्। विशिष्टातिथिरूपेण प्रो. शरदिन्दुकुमारतिवारी, संस्कृतविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी, संस्कृतभाषायाः महत्त्वे व्यापकप्रयोगे च प्रकाशं नीतवान्। सः अवदत् यत् संस्कृतस्य अध्ययनं केवलमेकस्याः भाषायाः अध्ययनं नास्ति, अपि तु भारतस्य आत्मनः, समृद्धायाः सांस्कृतिकपरम्परायाः, साहित्यिकविरासतायाः, ज्ञानविज्ञानस्य गौरवशालिनः इतिहासस्य च अवगमनस्य माध्यमम् अस्ति। तेन उक्तं यत् संस्कृतं भारतीयसंस्कृतेः मूलचेतनया सह सम्बद्धा भाषा अस्ति। अस्यां भारतस्य प्राचीनज्ञानपरम्परा, जीवनदर्शनम्, आध्यात्मिकचिन्तनं मानवीयमूल्यानि च विपुलेन प्रमाणेन सुरक्षितानि सन्ति। संस्कृतसाहित्ये निहितं ज्ञानं केवलमतीतस्य धरोहरं न, अपि तु वर्तमानसमाजस्य कृते अपि अत्यन्तोपयोगि प्रासङ्गिकं च वर्तते। वेदेषु, उपनिषत्सु, पुराणेषु, रामायणे, महाभारते, दर्शनशास्त्रे, काव्ये, नाटके विभिन्नेषु शास्त्रेषु च जीवनं सार्थकं सन्तुलितं च कर्तुं बहवः महत्त्वपूर्णाः सन्देशाः निहिताः सन्ति इति प्रो. तिवारी प्रतिपादितवान्। संस्कृतस्य अध्ययनद्वारा व्यक्तिः स्वकीयाभिः मूलपरम्पराभिः, संस्कृत्या गौरवशालिभिश्च परम्पराभिः परिचितो भवति तथा तस्य अन्तःकरणे राष्ट्रियचेतना सांस्कृतिकात्मगौरवं च विकसितं भवति इति तेन विशेषतया उक्तम्। गोष्ठ्यां संस्कृतस्य भविष्यं, नवीनशिक्षानीतौ संस्कृतस्य भूमिका, भारतीयज्ञानपरम्परायाः संरक्षणं, विद्यार्थिषु संस्कृतस्य प्रसारः इत्यादिषु विषयेषु सार्थकः विमर्शः सम्पन्नः। कार्यक्रमेन संस्कृतस्य आधुनिक- शिक्षाव्यवस्थया सह समन्वयस्य आवश्यकता विशेषतया प्रकाशिता।



## संस्कृतभाषायाः सुदृढीकरणाय सर्वैः स्वसामर्थ्यं वर्धनीयम्

### रत्नागिरी- संस्कृतोपकेन्द्रस्य सञ्चालकः डॉ. दिनकरमराठे इत्यस्य प्रतिपादनम्

हिमसंस्कृतवार्ताः-प्रत्येकः जनः सामर्थ्यसम्पन्नः अस्ति। अद्यतनकाले संस्कृतभाषायाः महत्त्वं अधिकाधिकं वर्धमानम् अस्ति। प्रत्येकः जनः विविधैः प्रकारैः संस्कृतभाषायै योगदानं दातुं समर्थः अस्ति। अतः संस्कृतभाषायाः सुदृढीकरणाय सर्वैः स्वसामर्थ्यं वर्धयितव्यम् इति प्रतिपादनं भारतरत्न- डॉ. पाण्डुरङ्गवामनकाणे- संस्कृताध्ययनकेन्द्रस्य रत्नागिरी- उपकेन्द्रस्य सञ्चालकेन डॉ. दिनकरमराठे-महोदयेन कृतम्। ते रत्नागिरी- संस्कृतोपकेन्द्रे आयोजितस्य संस्कृतदिन-कार्यक्रमस्य अध्यक्षस्थानात् सम्बोधयन् एतत् प्रतिपादितवन्तः। कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयस्य भारतरत्न- डॉ. पाण्डुरङ्गवामनकाणे-संस्कृताध्ययनकेन्द्रस्य रत्नागिरी- उपकेन्द्रे संस्कृतदिनस्य आयोजनं विशिष्टतया नूतनतापूर्णरीत्या च कृतम्। अस्मिन् कार्यक्रमे उपकेन्द्रस्य लिपिकरूपेण कार्यरतया कल्पजा-जोगळेकर- महोदयया संस्कृतगीतं प्रस्तुतम्। स्वरूपकाणेमहोदयेन संस्कृतभाषया वार्ताः प्रस्तुताः। उपकेन्द्रस्य प्रा. अविनाश- चव्हाण- महोदयेन सन्त-एकनाथस्य अभङ्गस्य संस्कृतभाषया निरूपणं कृतम्। तथैव प्रा. कानिफनाथपंढरे- महोदयेन, प्रा. रियाबिष्ट- महोदयया योगस्य प्राणायामस्य च सम्पूर्णं प्रात्यक्षिकम् आवश्यकाभिः सूचनाभिः सह संस्कृतभाषया प्रस्तुतम्। अपि च उपकेन्द्रस्य परियोजनासहायिकाभ्यां सई-ओक-महोदयया जान्हवी-पाध्ये-महोदयया च क्रमशः धर्मशास्त्रस्य सङ्गीतशास्त्रस्य च मतितार्थः संस्कृतभाषया स्पष्टतया विवृतः। उपकेन्द्रस्य कक्षाधिकारिणा प्रथमेश- घोसाळे- महोदयेन, कार्यालयसहायकेन करण-कीर-महोदयेन, लिपिकया अपर्णा- कोकरे- महोदयया संस्कृतभाषया परस्परं सुसंवादः स्थापितः। अस्मिन् कार्यक्रमे गीतम्, योगः, वार्ताः, संवादः, साहित्यं च इत्यादीनां संस्कृतस्य विविधरूपाणां सुन्दरं दर्शनं जातम्। कार्यक्रमस्य समापनसमये डॉ. दिनकरमराठे- महोदयेन संस्कृतभाषां ये जानन्ति, संस्कृतेन ये भाषन्ते च, तैः सर्वैः समर्थतया संस्कृतभाषायाः पक्षः सुदृढः करणीयः इति आवाहनं कृतम्।





# गाजोलमहाविद्यालये विश्वसंस्कृतदिवसोत्सवः सम्पन्नः



हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः

"संस्कृतं ज्ञानस्य शाश्वतप्रकाशः" इति सन्देशेन संस्कृतप्रेमिणां समागमः

गाजोलमहाविद्यालयस्य संस्कृतविभागस्य व्यवस्थापनेन, संस्कृतभारती–उत्तरबङ्गस्य, अखिलभारतीय- राष्ट्रीय- शैक्षिक- महासङ्घस्य (उच्चशिक्षा), अखिलभारतीय- विद्यार्थी- परिषदः, गाजोलमहाविद्यालय- शाखायाः सहयोगेन विश्वसंस्कृतदिवसोत्सवः हर्षोल्लासेन, गरिमापूर्णेन च वातावरणेन सम्पन्नः। महाविद्यालयस्य गीताञ्जलि- सेमिनारकक्षे २८ अगस्त २०२६ दिनाङ्के अपराह्ने एकवादने कार्यक्रमस्य आयोजनम् अभवत्। कार्यक्रमस्य अध्यक्षस्थानम् गाजोल- महाविद्यालयस्य प्राचार्यः माननीयः डॉ. मनोजकुमारभोजः अलङ्कृतवान्। मुख्यातिथिरूपेण संस्कृतभारती– उत्तरबङ्गस्य शिक्षणप्रमुखा माननीया तापसीमण्डलमहोदया, गाजोल- महाविद्यालयस्य दर्शनविभागस्य सहयोगी- अध्यापकः, शिक्षानुषदः अध्यक्षश्च माननीयः डॉ. निरङ्कुशचक्रवर्ती उपस्थितौ आस्ताम्। कार्यक्रमस्य मूलभावना आसीत्- "संस्कृतं ज्ञानस्य शाश्वतप्रकाशः", "संस्कृतस्य शाश्वततत्त्वैः ज्ञानजागरणस्य नवोदयः।" कार्यक्रमस्य माध्यमेन संस्कृतभाषायाः प्राचीनता, वैज्ञानिकता, साहित्यिकसमृद्धिः तथा भारतीयज्ञानपरम्परायां तस्याः महत्त्वपूर्णं स्थानम् इत्येतत् विषये जनचेतनायाः प्रसारः कर्तुं प्रयत्नः कृतः। संस्कृतभाषा केवलं प्राचीनभाषा न, अपि तु भारतीयज्ञान- विज्ञान- दर्शन- साहित्य- संस्कृतेः समृद्धपरम्परायाः प्रमुखा वाहिका अस्ति इति सन्देशः कार्यक्रमे विशेषतया प्रतिपादितः। मुख्यातिथिः माननीया तापसीमण्डल-महोदया स्वभाषणे संस्कृतस्य अध्ययन- अध्यापनयोः महत्त्वं, संस्कृतसम्भाषणस्य आवश्यकता तथा नूतनपीढ्यां संस्कृतभाषायाः प्रति अनुरागस्य सृजनम् इत्यादिविषयान् प्रकाशयितवती। संस्कृतं जनसामान्येषु अधिकाधिकं प्रचलितं भवेत् तथा छात्राः संस्कृतभाषां केवलं परीक्षाविषयरूपेण न स्वीकृत्य जीवनस्य ज्ञानपरम्परायाः महत्त्वपूर्ण- माध्यमरूपेण स्वीकरोतु इति सा आह्वानं कृतवती। डॉ. निरङ्कुशचक्रवर्तीमहोदयेन संस्कृतस्य ज्ञानपरम्परायां योगदानं, भारतीयदर्शनस्य विकासे संस्कृतस्य भूमिका, आधुनिकशिक्षाक्षेत्रे संस्कृतस्य प्रासङ्गिकता इत्यादिषु विषयेषु सारगर्भितं मार्गदर्शनं प्रदत्तम्। कार्यक्रमस्य अध्यक्षः डॉ. मनोजकुमारभोजः संस्कृतभाषायाः संरक्षण- संवर्धन- प्रचारयोः आवश्यकता प्रतिपाद्य छात्र- छात्राणां संस्कृताध्ययने सक्रियभागग्रहणाय प्रेरणां दत्तवान्। तेन उक्तं यत् संस्कृतभाषा भारतीयसंस्कृतेः मूलाधारभूता अस्ति, तस्याः समृद्धज्ञानसम्पदः आधुनिकसमाजाय अपि अत्यन्तं उपयोगिन्यः सन्ति। अस्य कार्यक्रमस्य सफलतायां गाजोलमहाविद्यालयस्य संस्कृतविभागस्य अध्यापकाः डॉ. अनिमेषमण्डलः, बिलास महलदारः, प्रभातरायः, संमित्रासरकारः, दर्शनविभागस्य अध्यापकः डॉ. प्रियरञ्जनदाशः च विशेषतया उल्लेखनीयां भूमिकां निर्वहितवन्तः। तेषाम् अथकपरिश्रमेण, समर्पितसेवया, सुचिन्तितयोजनया च सम्पूर्णः कार्यक्रमः सफलतया सम्पन्नः अभवत्। कार्यक्रमस्य आयोजनात् आरभ्य व्यवस्थापनपर्यन्तं ते सर्वे निरन्तरं परिश्रमं कृत्वा समारोहस्य गरिमां वर्धितवन्तः। तेषां सामूहिकप्रयत्नेन विश्वसंस्कृतदिवसोत्सवः अत्यन्तं सफलः, सार्थकः, स्मरणीयश्च अभवत्। कार्यक्रमस्य समापनसमये संस्कृतभाषायाः प्रति अनुरागं वर्धयितुं, भारतीयज्ञानपरम्परां च विश्वस्तरे पुनः प्रकाशयितुं सामूहिकसङ्कल्पः अभवत्। सम्पूर्णं महाविद्यालय-परिसरं संस्कृतमयेन वातावरणेन परिपूर्णम् अभवत्। अन्ते आयोजकैः उपस्थितेभ्यः सर्वेभ्यः अतिथिभ्यः, शिक्षकभ्यः, छात्रेभ्यः, संस्कृतप्रेमिभ्यश्च कृतज्ञता ज्ञापिता।



# सरस्वती- संस्कृत- महाविद्यालये सम्पन्नं संस्कृतदिवसाचरणम्

**हिमसंस्कृतवार्ताः-** केन्द्रियसंस्कृतविश्वविद्यालयेन सम्बद्धे, पञ्जाबराज्यस्य खन्नानगरे स्थिते सरस्वतीसंस्कृतमहाविद्यालये संस्कृतदिवसावसरे छात्रावबोधनकार्यक्रमः सम्पन्नः। समारोहस्य मुख्यवक्तृरूपेण पञ्जाबीविश्वविद्यालय-पटियालायाः संस्कृत- पालिविभागस्य प्राध्यापकः प्रो. वीरेन्द्रशर्ममहोदयः उपस्थितः आसीत्। तेन स्वकीये ओजस्विनि वक्तव्ये संस्कृतभाषायाः संरक्षणस्य, दैनन्दिनव्यवहारे च तस्याः प्रयोगस्य महत्त्वं प्रतिपादितम्। समारोहस्य मुख्यातिथिरूपेण उत्तरक्षेत्रस्य गीताशिक्षणप्रमुखः जोगिन्दरमहोदयः, विशिष्टातिथिरूपेण च संस्कृतभारत्याः पञ्जाबप्रान्तस्य मन्त्री अजयआर्यमहोदयः मञ्चम् अलङ्कृतवन्तौ। जोगिन्दरमहोदयेन गीतायाः दिव्यसन्देशान् जीवने अङ्गीकर्तुं छात्राः प्रेरिताः। श्रीअजयआर्यमहोदयेन तु पञ्जाबप्रान्ते संस्कृतभारत्याः कार्यविस्तारस्य, संस्कृतस्य जनभाषाकरणस्य च सङ्कल्पः पुनः स्मारितः।समारोहे महाविद्यालयस्य छात्रैः संस्कृतेन विविधाः सांस्कृतिकप्रस्तुतयः, श्लोकोच्चारणम्, गीतमञ्चनं च प्रस्तुतम्। अन्ततः महाविद्यालयस्य प्राचार्येण सर्वेभ्यः अभ्यागतेभ्यः धन्यवादज्ञापनं कृतम्, कार्यक्रमश्च राष्ट्रगीतेन सह सम्पन्नः अभवत्। अस्मिन् कार्यक्रमे प्रायः शतं छात्राः जनाश्च सम्मिलिताः आसन्। अवधातव्यं यत् एषः महाविद्यालयः शतवर्षेभ्योऽपि प्राचीनः वर्तते, उत्तरक्षेत्रे च अस्य महती प्रसिद्धिः वर्तते। अस्मिन् अवसरे महाविद्यालयस्य अध्यापकाः, नगरस्य गणमान्यसदस्याः, समितिसदस्याश्च समुपस्थिताः आसन्।

## रक्षाबन्धनात् पूर्वं श्रवणकुमारस्य पूजनम् श्रवणकुमाराय प्रथमं रक्षासूत्रं किमर्थम्?

**- डॉ. विदुषी अग्रवालः।** पारम्परिककथायां वर्ण्यते यत् राजा दशरथेन अज्ञानतावशात् श्रवणकुमारः बाणेन हतः। पुत्रस्य मृत्योः समाचारं श्रुत्वा तस्य शोकाकुलौ माता- पितरौ अपि प्राणान् अत्यजताम्। पारम्परिकमान्यतानुसारं राजा दशरथः पश्चात् श्रावणपूर्णिमायां श्रवणकुमारस्य स्मृतौ रक्षासूत्रं समर्पितवान्। कालान्तरे एषा परम्परा श्रावणपूर्णिमायां श्रवणकुमारस्य स्मरणेन पूजनेन च सम्बद्धा अभवत्। रक्षाबन्धनं स्वयं प्रेम्णः, रक्षणस्य, पारिवारिकस्नेहस्य च पवित्रं पर्व अस्ति। श्रवणकुमारस्य चरित्रे माता-पितरौ प्रति पूर्णा भक्तिः प्रमुखरूपेण प्रदर्शिता अस्ति। परम्परागतकथानुसारं श्रवणकुमारः दृष्टिहीनौ स्वमातरं पितरं च कावडयोः स्थापित्वा तौ तीर्थयात्रायै नीतवान्। अतः तस्य चरित्रं निम्नलिखितानां सद्गुणानाम् आदर्शरूपेण मन्यते- - निःस्वार्थसेवा।

- माता-पित्रोः परिवारस्य च प्रति कर्तव्यपालनम्।
- स्वार्थस्य परित्यागपूर्वकं समर्पणम्। - निष्कामं प्रेम।
- स्वकीयजनानां संरक्षणं पालनं च। एतेन कारणेन रक्षाबन्धनस्य पूर्वं श्रवणकुमारस्य स्मरणं पूजनं च विशेषमहत्त्वं प्राप्नोति। श्रवण-पूजा रक्षाबन्धनस्य भावार्थम् अधिकं व्यापकं करोति। रक्षाबन्धनं केवलं "भ्राता भगिन्याः रक्षणं करोति।" इत्येव न, अपि तु "परिवारस्य प्रत्येकं सदस्यस्य परस्परं रक्षणं, सेवां, पालनं च प्रति पवित्रं दायित्वम् अस्ति।" इति सन्देशं ददाति।



# अतीतं वर्तमानं च अवगन्तुं सशक्तं माध्यमम् अस्ति संस्कृतम्- प्रो. वारिकः

# संस्कृतविश्वविद्यालये संगोष्ठी आयोजिता



हिमसंस्कृतवार्ताः- राघव नाथ झा, दरभङ्गा।

संस्कृतविश्वविद्यालये प्रचलन्त्याः संस्कृत- सप्ताह- शृङ्खलायाः पञ्चमे दिवसे शनिवासरे 'संस्कृतं विज्ञानं च' इति विषये आयोजितायाः संगोष्ठ्याः अध्यक्षतां कुर्वन् विश्वविद्यालयस्य छात्रकल्याणसङ्कायाध्यक्षः प्रो. पुरेन्द्रारिकः अवदत् यत् संस्कृतम् अतीतस्य सहैव वर्तमानस्य अपि ज्ञाने अवगमने च सशक्तं माध्यमम् अस्ति। भारतीयवैज्ञानिकचिन्तनस्य ज्ञानपरम्परायाः च अवबोधे इयं भाषा महती सहायिका वर्तते। सः अकथयत् यत् आधुनिक- विज्ञानस्य प्राचीनभारतीयज्ञानपरम्परायाः च मध्ये सम्भाषणं सम्बन्धं च संस्थाप्य नूतनपीढ्याः कृते अनुसन्धानस्य नूतनाः आयामाः उद्घाटयितुं शक्यन्ते। एतां वार्तां ददता जनसम्पर्काधिकारिणा (पीआरओ) डॉ. निशिकान्तेन उक्तं यत् प्रायशः सर्वेऽपि वक्तारः विज्ञानसंस्कृतयोः सम्बन्धं स्वस्वदृष्टिकोणेन प्रास्तौषन्। सारस्वतातिथिः प्रो. दयानाथझा मुख्यवक्ता च ल. ना. मि. विश्वविद्यालयस्य रसायनशास्त्रविभागस्य सहायकप्राचार्यः डॉ. सोनुरामशङ्करः विषयवस्तु विस्तरेण प्रास्तौताम्। वक्तिभिः संस्कृतशास्त्रेषु वर्णितानि वैज्ञानिकतथ्यानि शास्त्रीयदिशा उपस्थापितानि। तैः उक्तं यत् संस्कृतविज्ञानयोः सम्बन्धः केवलम् ऐतिहासिकगौरवस्य विषयः न, अपि तु आधुनिकज्ञानविज्ञानस्य सन्दर्भेऽपि अतीव महत्त्वपूर्णः वर्तते। संस्कृतस्य वैज्ञानिकता तस्य सुव्यवस्थितव्याकरणे, ध्वनिविन्यासे, शब्दरचनायां, तर्कसङ्गतवाक्यविन्यासे च स्पष्टतया परिलक्ष्यते। महर्षिपाणिनिना विरचितायाम् अष्टाध्याय्यां प्रायेण चतुःसहस्रसूत्रैः भाषा अतीव व्यवस्थितनियमेषु ग्रथिता अस्ति। इयमेव नियमबद्धता अद्यत्वे सङ्गणकीयभाषाविज्ञानस्य (कम्प्यूटेशनल् लिङ्गविस्टिक्स) अध्ययने विशेषजिज्ञासायाः विषयः संजाता अस्ति। विशेषतया पाणिनीयव्याकरणस्य आधुनिक- कृत्रिमबुद्धेः (एआई) च मध्ये संवादः अद्य शोधस्य उद्भवन् नूतनः विषयः वर्तते। पाणिनीयव्याकरणं भारतीयभाषाणां सङ्गणकीय- प्रक्रियायै (कम्प्यूटेशनाय) एकः सम्भाव्यः साझा- आधाररूपेण स्वीक्रियते। संस्कृतेन सह विज्ञानस्य सम्बन्धः केवलं सङ्गणक- विज्ञानपर्यन्तं सीमितः नास्ति; अपि तु आयुर्वेदः, गणितं, ज्यौतिषं, खगोलशास्त्रं वास्तुशास्त्रं, धातुविज्ञानं, दर्शनं, तर्कशास्त्रम् इत्यादीनां भारतीय- ज्ञान- शास्त्राणां विशालं वाङ्मयं संस्कृते उपलब्धमस्ति। अस्याः ज्ञानसम्पदः आधुनिकवैज्ञानिकपद्धत्या, अङ्कीयप्रविधिकया (डिजिटलविधिना), अनुसन्धानेन च सह संयोजनम् अद्यतनम् आवश्यकम् अस्ति। अस्मिन्नेव क्रमे उपकुलसचिवेन डॉ. नवीनकुमारझा महोदयेन उक्तं यत् आधुनिकसमये कृत्रिमबुद्धिमत्ता (एआई), प्राकृतिकभाषासंस्करणं (एनएलपी), यन्त्रानुवादः, अङ्कीयपाठविश्लेषणं (डिजिटल टेक्स्ट), ज्ञानप्रतिनिधित्वं (नॉलेज रिप्रेजेन्टेशन) इत्यादिषु क्षेत्रेषु संस्कृतस्य अध्ययनस्य नूतनाः सम्भावनाः प्रकटीभूताः सन्ति। संस्कृतस्य सन्धेः, समासस्य, रूपविज्ञानस्य, वाक्यसंरचनायाः च सङ्गणकेन अवगमनाय पाणिनीयव्याकरणस्य नियमानाम् उपयोगविषये अनुसन्धानं प्रचलति। कार्यक्रमस्य सञ्चालनं डॉ. अवधेशश्रोत्रियः, सत्रसंयोजनं च डॉ. सविता आर्या अकरोत्। स्वागतभाषणं कार्यक्रम- संयोजकेन साहित्यविभागस्य सहायकप्राचार्येण डॉ. सुधीरकुमारेण प्रस्तुतम्। अस्यां संगोष्ठ्यां वित्तपदाधिकारी डॉ. पवनकुमारझा, सीडीसी डॉ. शिवलोचनझावर्यः, उपकुलसचिवः डॉ. नवीनकुमारझा, डॉ. सुनीलकुमारझा, डॉ. सन्तोषपासवानः, परीक्षानियन्त्रकः डॉ. निहाररञ्जनसिन्हा, डॉ. रामसेवकझा, डॉ. शम्भुशरणतिवारी, डॉ. भगलुझा, डॉ. छविलालन्यौपाने, डॉ. प्रमेशमिश्रः, डॉ. वरुणकुमारझा, संयोजिका डॉ. ममतापाण्डेया, डॉ. निशा, डॉ. गोपाल उपाध्यायः इत्यादयः बहवः विद्वांसः उपस्थिताः आसन्।




## वेदप्रचारसप्ताहस्य चतुर्थदिवसे विविधवेशभूषागतिविधेः आयोजनम्

**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, भागलपुर, बिहार**

बिहारराज्यस्य डीएवी- पब्लिक- स्कूल- बरारी- भागलपुरविद्यालयस्य, परिसरे वेदप्रचारसप्ताहस्य चतुर्थदिवसस्य उपलक्ष्ये विशेषप्रार्थनासभायाः आयोजनं जातम्। सभायां विद्यार्थिभिः "कालिदासो जने जने" इति संस्कृतगीतस्य मधुरा मनोहारिणी प्रस्तुतिः कृता। अस्मिन् अवसरे विद्यालयस्य शिक्षकः मनीषकुमारः विद्यार्थिभ्यः गुरुकुल- प्रणाल्याः वैशिष्ट्यानां शैक्षिकमहत्त्वस्य च विषये विस्तरेण ज्ञानं प्रदत्तवान्। तेन भारतीय- शिक्षा- परम्परायां गुरुकुलव्यवस्थायाः योगदानं तथा विद्यार्थिनां सर्वाङ्गीणविकासे तस्याः महत्त्वं च प्रतिपादितम्। एतदतिरिक्तं एलकेजीकक्षातः द्वितीयकक्षापर्यन्तं विद्यार्थिभ्यः विविधवेशभूषा (फेन्सी- ड्रेस) गतिविधेः आयोजनम् अभवत्। लघुबालकाः श्रीकृष्णस्य, अन्येषां महापुरुषाणां प्रेरणादायकचरित्राणां च वेशभूषां धृत्वा अत्यन्तं मनोहारिणः आकर्षकाश्च दृश्यन्ते स्म। बालकानां प्रस्तुतिभिः सर्वेषां मनांसि आकृष्टवन्तः।

विद्यालयस्य प्राचार्यः सह सहायकक्षेत्रीयाधिकारी च अनिलकुमारमहाशयः स्वीयसम्बोधने अवदत् यत्- "एतादृशीभिः गतिविधिभिः वयं विद्यार्थिभ्यः भारतीयसंस्कृतेः, परम्परायाः नैतिकमूल्यानां च ज्ञानं प्रभावीरीत्या दातुं शक्नुमः। एतादृशाः कार्यक्रमाः बालकेषु आत्मविश्वासं, सृजनशीलतां तथा स्वसंस्कृतिं प्रति गौरवभावनां च उत्पादने सहायकाः भवन्ति।" विद्यार्थिनः सम्पूर्णेन उत्साहेन आत्मविश्वासेन च गतिविधौ भागं गृहीत्वा कार्यक्रमं सफलं कृतवन्तः। कार्यक्रमस्य सफलसञ्चालने स्वीटीदत्ता, अनुश्री, श्लोका, रियासिंहः, ममता, फरहीन नाज, प्रियाभारती, वन्दितावर्मा, वसुन्धराकुमारी, डेजीकुमारी, आशीषकुमारदासः, प्रियाकुमारी इत्यादीनां विद्यालयस्य समस्तशिक्षक- शिक्षिकाणां शिक्षकेतरकर्मचारिणां च भूमिका प्रशंसनीया आसीत्।

# श्रीकृष्णजन्माष्टमीमहोत्सवस्य उपलक्ष्ये नारायणपुरप्रखण्डे कलशशोभायात्रा



भागलपुरम्, २९ अगस्त २०२६। -डॉ विमलेश झा

बिहारराज्यस्य भागलपुरजनपदस्य नारायणपुरप्रखण्डे शनिवासरे श्रीकृष्णजन्माष्टम्याः पावनपर्वणः उपलक्ष्ये सप्ताहव्यापी श्रीमद्भागवतकथायाः शुभारम्भः अभवत्। अस्मिन् अवसरे ५०१ महिलाभिः युवतीभिश्च भव्यकलशशोभायात्रायाः आयोजनं कृतम्। कलशशोभायात्रा कृष्णमन्दिरपरिसरात् प्रारब्धा अभवत्। महिलाः स्वमस्तके कलशान् धृत्वा मधुरापुरस्थं गङ्गाघाटं प्रति प्रस्थितवत्यः। तत्र ताभिः कलशेषु गङ्गाजलं पूरितम्। ततः सर्वे श्रद्धालवः पुनः मन्दिरपरिसरं प्रत्यागतवन्तः, यत्र पण्डिताः वैदिकमन्त्रोच्चारणपूर्वकं कलशान् स्थापितवन्तः। शोभायात्रायाः समये ढोलवादनस्य मधुरध्वनिना वातावरणं भक्तिमयमभवत्। 'हाथी घोड़ा पालकी, जय कन्हैया लाल की' इत्यादिभिः जयघोषैः श्रीकृष्णस्य भक्तिगीतैश्च सम्पूर्णं क्षेत्रं गुञ्जितं जातम्। अस्मिन् धार्मिकसमारोहे मुखिया सञ्जीवकुमारः, रणविजययादवः, मंटूयादवः,देवेन्द्रयादवः इत्यादयः अनेके जनप्रतिनिधयः सहस्रशः श्रद्धालवश्च सहभागितां कृतवन्तः। मुखियासञ्जीवकुमारेण उक्तं यत् सितम्बरमासस्य चतुर्थदिनाङ्के जन्माष्टमीपर्वणि भगवतः श्रीकृष्णस्य जन्मोत्सवः भव्यरूपेण आयोजयिष्यते। प्रखण्डप्रमुखप्रतिनिधिना मंटूयादवेन सूचितं यत् तथा सितम्बरमासस्य पंचषड्दिनाङ्कयोः अपराह्णे द्विवादने दङ्गलप्रतियोगिता आयोजयिष्यते। अस्यां प्रतियोगितायां नेपालदेशात्, उत्तरप्रदेशात्, झारखण्डप्रदेशात्, दिल्लीप्रदेशात्, महाराष्ट्रप्रदेशात्, बङ्गालप्रदेशात्, कटिहारनगरात्, भागलपुरनगरात्, खगडियातः, बेगूसरायनगरात्, पटनातः च आगताः पुरुषाः महिलाश्च मल्लाः सहभागं करिष्यन्ति।

# संस्कृतं विना भारतीयसंस्कृतेः कल्पना अपूर्णा विजयशङ्करदुबेः



### संस्कृतदिवससमारोहे विद्वांसः अवदन्-

## हिन्दीभाषायाः समृद्धये

### भारतीयज्ञानपरम्परायाः संरक्षणाय च संस्कृतस्य अध्ययनम् आवश्यकम्

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्।

बिहार-झारखण्ड-राज्ययोः भूतपूर्वः मुख्यसचिवः विजयशङ्करदुबे-महोदयः अवदत् यत् संस्कृतं विना भारतीयसंस्कृतेः कल्पना अपूर्णा वर्तते। संस्कृतभाषा कामधेनुसदृशी अस्ति, अस्याः उपयोगिता च सर्वेषु युगेषु स्थिरा वर्तते। भारतीयसंस्कृतेः ज्ञानपरम्परायाः च मूलम् आधारं संस्कृतमेव अस्ति। सः गुरुवासरे पाटलिपुत्र-वसतौ स्थिते पेन्शनरभवने 'विहार संस्कृत संजीवन समाज, पटना' तथा 'पेन्शनर-भवनम्' इत्यनयोः संयुक्ताश्रये आयोजिते संस्कृतदिवससमारोहे सम्बोधनं कुर्वन् आसीत्।

समारोहस्य अध्यक्षतां बिहार- संस्कृत- संजीवन-समाजस्य अध्यक्षः डॉ. शिववंशपाण्डेय-महोदयः अकरोत्। मुख्यवक्त्री प्रो. रागिनीवर्मा, विशिष्टातिथिः बिहारसर्वकारस्य भूतपूर्वः विशेषसचिवः डॉ. उपेन्द्रनाथपाण्डेयः च आसन्। कार्यक्रमस्य सञ्चालनं संस्थायाः महासचिवः डॉ. मुकेशकुमारओझा- महोदयः संस्कृतभाषया अकरोत्। कार्यक्रमस्य शुभारम्भः मङ्गलाचरणेन अभवत्। स्वागतभाषणे डॉ. मुकेशकुमार ओझा अवदत् यत् संस्कृतदिवसः केवलम् उत्सवः न, अपितु संस्कृतस्य संरक्षणार्थं प्रचाराय प्रसाराय च सङ्कल्पग्रहणस्य अवसरः अस्ति। सः समाजस्य सर्ववर्गेभ्यः अस्मिन् कार्ये सक्रियसहयोगाय आह्वानम् अकरोत्।

मुख्यवक्त्री प्रो. रागिनीवर्मा अकथयत् यत् आधुनिके युगे संस्कृतस्य उपयोगिता पूर्वापेक्षया अधिका संवृद्धा। हिन्दीभाषायाः समृद्धये तस्याः मूलस्वरूपस्य संरक्षणाय च संस्कृतस्य अध्ययनम् आवश्यकम् अस्ति। विशिष्टातिथिः डॉ. उपेन्द्रनाथपाण्डेयः अवदत् यत् भारतीय- सांस्कृतिक-पौराणिकमूल्यानां पुनर्प्रतिष्ठापनाय जगति भारतस्य विशिष्टपरिचयाय च संस्कृतभाषैव मूलकारणम् अस्ति।

अध्यक्षीयभाषणे डॉ. शिववंशपाण्डेयः संस्थायाः स्थापनायाः, उद्देश्यानां, संस्कृतप्रचार-प्रसारार्थं क्रियमाणानां प्रयासानां विषये विस्तरेण न्यवेदयत्। सः अकथयत् यत् संस्कृतं जनं जनं प्रति नेतुं समाजस्य सक्रिया सहभागिता अनिवार्या अस्ति।

अस्मिन् अवसरे डॉ. अनिलकुमारचौबे, डॉ. मीनाक्षी प्रसादः, डॉ. नीराकुमारी, डॉ. रागनीकुमारी, शम्भुनाथपाण्डेयः, तरुणकुमारपाण्डेयः, डॉ. भारतीकुमारी, डॉ. रामनारायणसिंहः च स्वविचारान् प्राकटयन्। कार्यक्रमस्य अन्ते श्रद्धाकुमार्या धन्यवादज्ञापनं कृतम्। तत्रैव डॉ. अनिलकुमारचौबेमहोदयः संस्कृतगीतं प्रस्तूय सर्वान् मन्त्रमुग्धान् अकरोत्।

# संस्कृतसप्ताहमहोत्सवे गुञ्जितः संस्कृति-संस्कृतयोः सन्देशः



## दीपप्रज्ज्वालनेन अभवत् शुभारम्भः, १०० तः अधिकैः छात्रैः

### भाषणप्रतियोगितायां गृहीतः भागः

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्।

राजकीय- संस्कृत- महाविद्यालये, काजीपुर- पाटलिपुत्रे शनिवासरे संस्कृतसप्ताहमहोत्सवस्य भव्यम् आयोजनं कृतम्। कार्यक्रमस्य शुभारम्भः अतिथिभिः दीपप्रज्ज्वालनेन वैदिकमन्त्रोच्चारणेन च सह अभवत्। तदनन्तरं छात्रैः महाविद्यालयस्य कुलगीतं प्रस्तूय वातावरणं संस्कृतमयं कृतम्।

कार्यक्रमस्य अध्यक्षतां कुर्वन् महाविद्यालयस्य अध्यक्षः डॉ. मनोजकुमार-महोदयः अवदत् यत् संस्कृतं देवभाषा अस्ति, अस्याः अध्येता अपि समाजे देवतुल्यं सम्मानं प्राप्नोति। मुख्यवक्तिरूपेण उपस्थितः कामेश्वरसिंह-दरभङ्गा- संस्कृत- विश्वविद्यालयस्य भूतपूर्वः कुलपतिः प्रो. उमेशशर्मा अकथयत् यत् भारतीयसंस्कृतेः संरक्षणं, संवर्धनं, विकासः च संस्कृतेन एव सम्भवः जातः। सः अवदत् यत् संस्कृतम् अज्ञात्वा भारतस्य आत्मा तस्य संस्कृतिः च ज्ञातुं न शक्यते।कार्यक्रमस्य सञ्चालनं कुर्वन् दर्शनविभागस्य सहायकप्राचार्यः डॉ. शशिकान्ततिवारी अवदत् यत् भारतस्य प्रतिष्ठा तस्य संस्कृतौ संस्कृते च निहिता वर्तते। संस्कृतस्य व्यापकेन प्रचार-प्रसारेण पठन-पाठनेन च देशः स्वकीयां गौरवान्वितां परम्परां पुनः प्राप्तुं शक्नोति। कार्यक्रमस्य संयोजिका, साहित्यविभागस्य वरिष्ठा सहायक- प्राचार्या डॉ. ज्योत्स्ना अकथयत् यत् भारतं तदैव पूर्णविकसितं राष्ट्रं भविष्यति, यदा संस्कृतं जनं जनं प्रति गमिष्यति। संस्कृतम् अस्माकं स्वाभिमानस्य सांस्कृतिक-अस्मितायाः च प्रतीकम् अस्ति। अस्मिन् अवसरे राजनीतिविभागस्य सहायकप्राचार्यः डॉ. सुजीतसौरभः, आङ्ग्लविभागस्य सहायकप्राचार्या डॉ. शबाना शिरीन च सहिताः महाविद्यालयस्य शिक्षकाः, कर्मचारिणः, विपुलायां संख्यायां च छात्राः उपस्थिताः आसन्। उद्घाटनसत्रस्य अनन्तरं छात्रैः शिक्षकैः च वैदिकरीत्या सामूहिकः हवनः सम्पन्नः। ततः परम् "भारतस्य प्रतिष्ठा संस्कृते निहिता" इति विषये भाषणप्रतियोगिता आयोजिता। प्रतियोगितायाः निर्णायकाः डॉ. शशिकान्ततिवारी, डॉ. सुजीतसौरभः च आसन्। प्रतियोगितायां १०० तः अधिकैः छात्रैः सोत्साहं भागः गृहीतः। उत्कृष्टप्रदर्शनेभ्यः चतुर्भ्यः प्रतिभागिभ्यः क्रमशः प्रथम- द्वितीय- तृतीय- सान्त्वना-पुरस्काराः च प्रदत्ताः। कार्यक्रमस्य समापनं शान्तिमन्त्रस्य सामूहिकपाठेन सह अभवत्।




अशोक दर्द

## जदु असां नीयों हौणा साहड़े गीत हौणे ओ

जदु असां नीयों हौणा साहड़े गीत हौणे ओ  
सुणी सजणा दे छम छम नैण रौणे ओ।।

याद आणियां ओ बीत्ति री बाहरां सारियां।  
दुखा सुखा केरे फुल्लां री भरी क्यारियां।।  
वादे भुल्ले चुक्के सारे फिरी माफ हौणे ओ।  
जदु असां नीयों हौणा साहड़े गीत हौणे ओ।

असां दूजे लोका जाई  
महफिलां सजाणियां।।  
गल्लां दिलां बिच्च रेईयां  
सब याद आणियां।

दिन सौग्गी कट्टे सजणा जो याद औणे ओ।।  
जदु असां नीयों हौणा साहड़े गीत हौणे ओ।।  
बड़ी याद आणी चानणी री राती लिक्खियां।  
पर उत्थे तक जाणी नी कुसे री चिट्ठियां।।  
उत्थे गे रे मुसाफर नी मुड़ी औणे ओ।  
जदु असां नीयों हौणा साहड़े गीत हौणे ओ।।  
साहड़े बिना जदु होली ते दयाली आणी ओ ।  
साहड़ी यादां उनां दिलडुआं आग्ग लाणी ओ ।।  
साहड़े लफ्जां दे जेहड़े बी मुरीद हौणे ओ।  
जदु असां नीयों हौणा साहड़े गीत हौणे ओ।।  
सुणी शैल्फां च रक्खियां कताबां रौणियां।  
रौणा नज़्मा बी डैरियां दे बिच्च सौहणियां।।  
बस कधां पुर लाये साहड़े फोटो हौणे ओ।  
जदु असां नीयों हौणा साहड़े गीत हौणे ओ।।